इन ब्राह्म-दैव-आर्ष-प्राजापत्य-आसुर-गान्धर्व-राक्षस-पैशाच विवाह के प्रकारों में ब्राह्म विवाह को सर्वोत्तम विवाह माना गया है। इससे उत्पन्न संतति २१ पीढ़ी को पवित्र करने वाली मानी गयी है। दैवविवाह अभी व्यवहार में नहीं देखी जाती। क्योंकि इसमें ज्योतिष्टोमादि महनीय यज्ञ कराने वाले आचार्य को अलंकरणों से सुसज्जित कन्या दान करने का विधान है। यह अभी व्यवहार में नहीं है। आर्ष विवाह में वर से (लोभ भावना से रहित होकर) गाय और बैल लेकर वाक्सिद्धि के लिए कन्या दान का विधान है। अतः ब्राह्म विवाह के अतिरिक्त अन्यान्य विवाह को समाज मान्यता नहीं देता। एतदर्थ ब्राह्मविवाह के अतिरिक्त समस्त सप्त विध विवाहों को क्रमशः अधमाधम कहा गया है।

एतदर्थ विवाह संस्कार के सप्तपदी के क्रम में वर कन्या से निम्नलिखित श्लोक के माध्यम से संकल्प कराता है।

आदौ धर्मधरा कुटुम्बसुखदा मिष्टाप्रियाभाषिणी।
क्रोधालस्यनिवारिका सुखकरा आज्ञानुगावर्तिनी।।
शास्त्रानन्दयवृद्धशासनपरा धर्मानुगा सादरम्।
एते सौम्यगुणा वसन्ति सततं वामेहि सा त्वं भव॥

अर्थात् प्रथम तो हमारे कुल का जो धर्म है उसे तू धारण करो, तो बाये अंग आओ (२) हमारा जो कुटुम्ब है उसको सुख दो, तो बायें अंग आओ (३) मीठे वचन उच्चारण करो और क्रोध, आलस्य का त्याग करो तथा धर्मानुकूल वृद्धजनों के उपदेश को सादर स्वीकार करो, तो बायें अंग आओ (४) यश और सुख दो तो बायें अंग आओ (५) मेरी आज्ञा का पालन करो तो बायें अंग आओ (६) मेरे जो माता-पिता हैं उनकी टहल करो तो बायें अंग आओ (७) मेरी जो बहनें हैं उनसे क्रोध न करो तो बायें अंग आओ। ये गुण तुम्हारे अन्दर हों तो बायें अंग आओ। इसके अनन्तर हृदयालम्भन का विधान है।

ॐ मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं तेऽअस्तु।
मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्॥

इस प्रकार ब्राह्म विवाह सकल विवाहों में सर्वश्रेष्ठ है।

विवाह विलम्बदोष निवारण हेतु उपचार-

विवाह विलम्ब के दोषों के निवारण हेतु वर कन्या के लिए ज्योतिष शास्त्र में पृथक् पृथक् उपाय बतायें गये हैं।

१. कन्या के मांगलिकयोग निवारणार्थ अश्वत्थ/कुम्भादिविवाह का विधान है।
२. विवाहार्थी लड़के लड़कियों को शारीरिक एवं मानसिक रूप से विवाह पूर्व पूर्ण ब्रह्मचर्य का पालन करना चाहिए।
३. विवाहविलम्ब योग वाले लड़कों को तद्योगकारक ग्रहों की आराधना के साथ जगदम्बा की आराधना करनी चाहिए। इसके साथ ही किसी अच्छे दैवज्ञ के परमर्श से शान्ति विधान करते हुए अपने जीवन को सफल करना चाहिए। इति दिक्।।

4. मुहूर्तचिन्तामणिः, विवाहप्रकरणम्, पीयूषधाराटीका

षोडशोपचार-देवपूजनविधिः

यज्ञकर्त्ता पूजन के दिन शान्तचित्त होकर शुद्ध-आसन पर पूर्वाभिमुख अथवा उत्तराभिमुख बैठकर आचमन प्राणायामादि करके अपने अभीष्ट देवता का स्मरण करके पूजन प्रारम्भ करे ।

सर्वप्रथम जल शुद्धि हेतु हाथ में जल कुश लेकर निम्नलिखित मन्त्र को पढ़े -

ॐअपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं सबाह्याऽभ्यन्तरः शुचिः॥

इस जल को पूजनोपकरण सामग्री एवं अपने शरीर पर छीटें ।

पुनः हाथ में जल लेकर गंगादि नदियों एवं प्रयागादि तीर्थों का स्मरण करते हुए निम्नलिखित मन्त्र से जल शुद्धि करे -

ॐगङ्गे च यमुने चैव गोदावरी सरस्वती ।
नर्मदे सिन्धु-कावेरी जलेऽस्मिन् सन्निधिं कुरु ॥

निम्नलिखित मन्त्र को पढ़कर आसन शुद्ध्यर्थ जल को आसन पर छीटें -

ॐपृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

निम्नलिखित मन्त्र से दिग्बन्धन हेतु पीला सरसों अथवा अक्षत दिशाओं में छीटें-

ॐ अपसर्पन्तु ते भूता ये भूता भूतले स्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

हाथ में पुष्पाक्षत लेकर अपने इष्टदेवता का स्मरण करते हुए स्वस्तिवाचन करे ।

शान्तिवाचनम्-

ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासोऽअपरीतासऽउद्भिदः ।
देवा नो यथा सदमिद् वृधेऽअसन्नप्रायुवो रक्षितारो दिवे दिवे ॥ १॥
देवानां भद्रा सुमतिर्ऋजूयतां देवानाँ रातिरभि नो निवर्त्तताम् ।
देवानाँ सख्यमुपसेदिमा वयं देवा नऽआयुः प्रतिरन्तु जीवसे ॥ २॥
तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्त्रिधम् ।
अर्यमणं वरुणँ सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ ३॥
तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद् ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥ ४॥
तमीशानं जगतस्तस्थुषस्पतिं धियन्जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ५॥
स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ६॥
पृषदश्वा मरुतः पृश्निमातरः शुभँ यावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवाऽअवसा गमन्निह ॥ ७॥
भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ ८॥
शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ ९॥
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवाऽअदितिः पञ्च जनाऽअदितिर्जातमदितिर्जनित्वम् ॥ १०॥

ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ँ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि॥

यतो यतः समीहसे ततो नोऽअभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः॥

ॐश्रीमन्महागणाधिपतये नमः।ॐलक्ष्मी-नारायणाभ्यां नमः।ॐउमामहेश्वराभ्यां नमः। ॐवाणी-हिरण्यगर्भाभ्यां नमः। ॐशची-पुरन्दराभ्यां नमः। ॐमातृ-पितृचरणकमलेभ्यो नमः। ॐइष्टदेवताभ्यो नमः। ॐकुलदेवताभ्यो नमः। ॐग्रामदेवताभ्यो नमः। ॐ स्थानदेवताभ्यो नमः। ॐवास्तुदेवताभ्यो नमः। ॐसर्वेभ्यो देवेभ्यो नमः। ॐसर्वेभ्यो ब्राह्मणेभ्यो नमः। ॐसिद्धि-बुद्धिसहिताय श्रीमन्महागणाधिपतये नमः॥

ॐशान्तिः शान्तिः शान्तिः ॥

अथ संकल्प :-

ॐविष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणोऽह्नि द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भारतवर्षे आर्यावर्तैकदेशान्तरगते ......नगरे/ग्रामे/क्षेत्रे....संवत्सरे .... अयने ..... ऋतौ..... मासे.... पक्षे....तिथौ..... वासरे.... गोत्रः ..... शर्मा/वर्मा/गुप्त/दासोऽहं श्रुतिस्मृतिपुराणोक्त-फलप्राप्त्यर्थं मम सकुटुम्बस्य सपरिवारस्य आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं दैहिक-दैविक-भौतिक-त्रिविध-तापोपशमनार्थं धर्मार्थ-काम-मोक्षफलप्राप्त्यर्थं सकलदुरितोपशमनार्थं नित्यकल्याणप्राप्त्यर्थं यथोपलब्ध-पूजनोपकरणैः अङ्देवतापूजनपूर्वक-(पूर्वाङ्गी-कृतं) श्री........प्रधानदेवतापूजनञ्चाहं करिष्ये ।

आवाहनम्- लौकिकम् : आगच्छन्तु सुरश्रेष्ठ ! भवन्तवत्र स्थिराः समे ।
यावत्पूजां करिष्यामि तावत्तिष्ठन्तु सन्निधौ ।।
वैदिकम्-ः ॐसहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।
सभूमि ँ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ।। आवाहनार्थं पुष्पं सम०।
लौकिकम्- : ॐ आगच्छागच्छ देवेश त्रैलोक्यतिमिरापह ।
क्रियमाणां मया पूजां गृहाण सुरसत्तम ।।
देव्याः- ॐ अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन ।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्।। आवाहनार्थं पुष्पाक्षतान् सम०।
आसनम्- लौ. : अनेकरत्नसंयुक्तं नानामणिगणान्वितम् ।
इमं हेममयं दिव्यमासनं प्रतिगृह्यताम् ।। पुष्पासनं सम०।।
(वै.) : ॐ पुरुषऽएवेद ँ सर्वं यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।
प्रतिष्ठा -(लौ.) अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ।।
प्राणप्रतिष्ठापूर्वकं नमस्करोमि ।

(वै.) : ॐमनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमं दधातु । विश्वेदेवास इहमादयन्तामोँ ३ प्रतिष्ठ ।।
पाद्यम्- (लौ.): ॐ गङ्गोदकं निर्मलञ्च सर्वसौगन्ध्य संयुतम् ।
पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ।।
(वै.): ॐएतावानस्य महिमातोज्यायाँश्च पुरुषः ।
पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि ।। पाद्यं सम०।।
अर्घ्यम्- (लौ.): गन्धपुष्पाक्षतैर्युक्तं मध्ये सम्पादितं मया ।
गृहाण भगवन् देव ! प्रसन्नो वरदो भव ।।
(वै.) : ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ।। अर्घ्यं सम०।।
आचमनम्- (लौ.) : कर्पूरेण सुगन्धेन वासितं स्वादु-शीतलम् ।
तोयमाचमनीयार्थं गृहाण परमेश्वर ।।
(वै.) : ॐ ततोव्विराडजायत व्विराजोऽअधिपूरुषः ।
सजातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ।। आचमनीयं जलं सम०।
जलस्नानम्- (लौ.) मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् ।
तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम् ।।
(वै.) : ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूस्ताँश्चक्रे वायव्या नारण्या ग्राम्याश्च ये ।। स्नानीयं जलं सम०।
दुग्धस्नानम्- (लौ.): कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ।।
(वै.): ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः।
पयस्वतीः प्रदिशः सन्तु मह्यम् ।। पयः स्नानं सम०।
दधिस्नानम्-(लौ.) : पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मया देव ! स्नानार्थं प्रतिगृह्यताम् ।।

(वै.) : ॐ दधिक्राब्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखाकरत्प्रणऽआयूँषितारिषत् । दधिस्नानं सम०।
घृतस्नानम्- (लौ.) : नवनीतं समुत्पन्नं सर्वसन्तोषकारकम् ।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ।।
(वै.) : ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतं वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहा कृतं वृषभवक्षि हव्यम् ।। घृतस्नानं सम०।
मधुस्नानम् (लौ.): पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ।।
(वै): ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्न्नः सन्त्वोषधीः । मधु नक्तमुतोषसो मधुमत्पार्थिवँरजः ।
मधुद्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्म्मधुमाँ२ऽअस्तु सूर्यः माध्वीर्गावो
भवन्तु नः ।। मधुस्नानं समर्पयामि ।
शर्करास्नानम् (लौ.) : इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम् ।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम् ।
(वै.): ॐ अपाँरसमुद्वयसँसूर्ये सन्तँसमाहितम्। अपाँ रसस्य योरसस्तंवो
गृह्णाम्युतममुपयाम गृहीतोसीन्द्रायत्वा जुष्टङ् गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टत-
मम्। शर्करास्नानं समर्पयामि ।
पञ्चामृतस्नानम्- (लौ.) : पयो दधि घृतं चैव मधु च शर्करान्वितम् ।
पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ।।
(वै.) ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः।
सरस्वती तु पञ्चधासो देशेऽभवत्सरित् ।। पञ्चामृतस्नानं सम ० ।
शुद्धोदकस्नानम्- (लौ.) : शुद्धं यत्सलिलं दिव्यं गंगाजलसमं स्मृतम् ।
समर्पितं मया भक्त्या शुद्धस्नानाय गृह्यताम्।। स्नानार्थं शुद्धोदकं सम०।
(वै.) ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्तऽआश्विनाः श्येतः श्येताक्षो रुणस्ते रुद्राय
पशुपतये कर्णा यामा अवालिप्ता रौद्रा नभो रूपाः पार्जन्याः। स्नानार्थं शुद्धोदकं सम०।

वस्त्रम्- (लौ.) : शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ।।
(वै.) : ॐ तस्माद्यज्ञात् सर्व्वहुतऋच सामानिजज्ञिरे।
छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत। वस्त्रोपवस्त्रञ्च सम०।
यज्ञोपवीतम्- (लौ.): यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः।।
(वै.) : ॐ तस्मादश्वाऽअजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ।। यज्ञोपवीतं सम०।
चन्दनम्- (लौ.): श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ ! चन्दनं प्रतिगृह्यताम् ।।
(वै.) : ॐ त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमोराजा विद्वान्यक्ष्मादमुच्यत ।। चन्दनं सम०।
अक्षतम्- (लौ.): अक्षताश्च सुरश्रेष्ठ! कुङ्कुमाक्ताः सुशोभिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ।।
(वै.) : ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ।
अस्तोषत स्वभानवो विप्रानविष्ठया मतीयोजान्विन्द्रते हरी। अक्षतं सम०।
पुष्पाणि-(लौ.) : ॐमाल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि गृहाण परमेश्वर! ।।
(वै.) : ॐयत्पुरुषं व्यदधुः कतिधाव्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादा उच्येते ।। पुष्पाणि सम०।
पुष्पमाला-(लौ.): ॐमाल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि गृहाण परमेश्वर ! ।।
(वै.) : ॐ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरी र्व्वीरुधः पारयिष्ण्वः।। ॐपुष्पमालां सम०।
दूर्वा- (लौ.) : ॐदूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान् ।
आनीतांस्तव पूजार्थं गृहाण परमेश्वर ! ।।

(वै.)ः ॐकाण्डात्काण्डाप्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनुसहस्रेण शतेन च ।। ॐदूर्वादलं सम०।
धूपः - (लौ.) ः ॐवनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।
(वै.)ः ॐ ब्राह्मणोऽस्यमुखमासीद् बाहूराजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्या्ँशूद्रोऽअजायत ।। धूपमाघ्रापयामि।
दीपः-(लौ.)ः ॐ साज्यञ्च वर्त्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ।।
(वै.)ः ॐचन्द्रमा मनसो जातश्चक्षोः सूर्य्योऽअजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।। ॐदीपं दर्शयामि।
नैवेद्यम्-(लौ.) ः ॐशर्कराखण्डखाद्यानि दधिक्षीरघृतानि च ।
आहारं भक्ष्यभोज्यञ्च नैवेद्यं प्रतिगृह्यताम् ।।
(वै.)ः ॐ नाभ्या आसीदन्तरिक्ष्ँशीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ऽअकल्पयन्।। ॐनैवेद्यं निवेदयामि।
ऋतुफलम्-(लौ.)ः ॐ इदं फलं मया देव! स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।।
(वै.)ः ॐयाः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः।
बृहस्पति प्रसूतास्तानो मुञ्चन्त्व्ँहसः।। ऋतुफलं सम०।
ताम्बूलम्- (लौ.) ः ॐपूगीफलं महद् दिव्यं नागवल्लीदलैर्युतम् ।
एलालवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ।।
(वै.)ः ॐयत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्मऽइध्मः शरद्धविः ।। ताम्बूलं सम०।
दक्षिणा- (लौ.)ःॐहिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।
(वै.)ः ॐहिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत्।
सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।। दक्षिणाद्रव्यं सम०।
मन्त्रपुष्पाञ्जलिः (लौ) ः ॐ श्रद्धया सिक्तया भक्त्या हार्दप्रेम्णा समर्पितः ।
मत्रपुष्पाञ्जलिश्चायं कृपया प्रतिगृह्यताम् ।।

(वै.) ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
तेहनाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।। मत्रपुष्पाञ्जलिं सम०।
ॐ यज्ज्ञेन यज्ज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्।
ते ह नाकम्महिमानः सचन्त यत्र पूर्व्वे साध्याः सन्ति देवाः ॥
ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वै श्रवणाय कुर्महे।
स मे कामान् काम कामाय मह्यं कामेश्वरो वैश्रवणो ददातु॥
कुबेराय वैश्रवणाय महाराजाय नमः॥
ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आन्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति तदप्येषश्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन गृहे। आवीक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥
ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः॥
ॐ तत्पुरुषाय विदाहे नारायणाय धीमहि तन्नो विष्णुः प्रचोदयात्॥
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वाऽनुसृतस्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयेत्तत्॥ पुष्पाञ्जलिं समर्पयामि।
प्रदक्षिणा-ॐ ये तीर्थानि प्प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषा्ँ सहस्रयोजनेव धन्वानि तन्मसि॥

क्षमा-प्रार्थना

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन। यत्पूजितं मया देव! परिपूर्णं तदस्तु मे॥
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्। तत्सर्वं क्षम्यतां देव! प्रसीद परमेश्वर॥

विसर्जनम्-

यजमानहितार्थाय पुनरागमनाय च। गच्छन्तु च सुरश्रेष्ठाः स्वस्थानं परमेश्वर।।

यजमान को आशीर्वाद-मन्त्र-

अक्षतान् विप्रहस्तात्तु नित्यं गृह्णन्ति ये नराः। चत्वारि तेषां वर्धन्ते आयुः कीर्तिर्यशोबलम्।।
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः। शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव॥
श्रीवर्चस्वमायुमायुष्यमारोग्यमाविधात् पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥ यजमान को आशीर्वादात्मक अक्षत दें।
।।ॐ शान्तिः शान्तिः शान्तिः।।

अथ तर्पणविधिः

प्रातः सन्ध्यां कृत्वा गायत्र्या एकमेकमञ्जलिं दद्यात्। ततः सूर्याभिमुखमुतिष्ठन् वदेत्-

ॐ असावादित्यो ब्रह्मः। ॐ उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्। ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्।

ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्राद्यावा पृथिवीऽअन्तरिक्षँ सूर्य्यऽआत्मा जगतस्तस्थुषश्च। तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतँ श्रुणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।

इति प्रार्थयन् हस्ते ताम्रपात्रे जलं कुशत्रयं, यवान्नक्षतांश्च गृहीत्वा सङ्कल्पं कुर्यात् । ततः संकल्पः-

ॐविष्णुर्विष्णुर्विष्णु अद्येत्यादि......शुभपुण्यतिथौ श्रुति-स्मृति-पुराणोक्त-फल- प्राप्त्यर्थं परमेश्वरप्रीत्यर्थं देव-ऋषि-मनुष्य-पितृतर्पणमहं करिष्ये।

(ततः शिवसंकल्पसूक्तं पठेत्। ततो दक्षिणहस्त-अनामिकया यज्ञोपवीतं धृत्वा निम्नमन्त्रं पठेत्।

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्य छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम्।।

तत आचम्य गायत्रीमन्त्रं त्रिवारं पठित्वा तज्जलमभिमन्त्र्य मुष्ठिनिःसृतजलेन कुशत्रयैः शिरः प्रभृति पादान्तं मार्जयेत्। शेषजलं भूमौ प्रक्षिपेत्। ततः सकृदाचम्य कुशत्रयं पूर्वाग्र-आवाहनपात्रे स्थापयित्वा दक्षकरेण सम्पुटीकृत्य निम्नलिखितं मन्त्रं पठेत्।

आगच्छन्तु महाभागा विश्वेदेवा महाबलाः।
ये तर्पणेऽत्र विहिताः सावधाना भवन्तु ते।।
ॐ विश्वेदेवाः शृणुतेमँ हवं मे ये अन्तरिक्षे य उपद्यविष्ठ।
ये अग्निर्जिह्वा ऽउत वा यजत्राऽआसद्यास्मिन् बर्हिषि मादयध्वम्।।(यजु.३३-५३)

१. देवतर्पणम्-

(पूर्वाभिमुख बैठें, यज्ञोपवीत सव्य हो, दाहिना घुटना जमीन पर हो, अर्घपात्र में चावल रखें, त्रिकुशा का अग्रभाग पूर्वाभिमुख हो, देवतीर्थ (अङ्गुली के अग्रभाग) से 1-1 जलाञ्जलि निम्नलिखित मत्र को पढ़ते हुए तर्पण करें)

ॐब्रह्मा तृप्यताम्। ॐ विष्णुस्तृप्यताम्। ॐ रुद्रस्तृप्यताम्। ॐ प्रजापतिस्तृप्यताम्। ॐ देवास्तृप्यन्ताम्। ॐछन्दांसि तृप्यन्ताम्। ॐवेदास्तृप्यन्ताम्। ॐऋषयस्तृप्यन्ताम्। ॐपुराणाचार्यास्तृप्यन्ताम्। ॐगन्धर्वाचार्यास्तृप्यन्ताम्। ॐइतराचार्यास्तृप्यन्ताम्। ॐसम्वत्सरः सावयवस्तृप्यताम्। ॐदेव्यस्तृप्यन्ताम्। ॐअप्सरसस्तृप्यन्ताम्। ॐदेवानुगास्तृप्यन्ताम्। ॐनागास्तृप्यन्ताम्। ॐसागरास्तृप्यन्ताम्। ॐपर्वतास्तृप्यन्ताम्। ॐसरितस्तृप्यन्ताम्। ॐमनुष्यास्तृप्यन्ताम्। ॐयक्षास्तृप्यन्ताम्। ॐरक्षांसि तृप्यन्ताम्। ॐपिशाचास्तृप्यन्ताम्। ॐसुपर्णास्तृप्यन्ताम्। ॐभूतानि तृप्यन्ताम्। ॐपशवस्तृप्यन्ताम्। ॐवनस्पतयस्तृप्यन्ताम्। ॐओषधयस्तृप्यन्ताम्। ॐभूतग्रामचतुर्विधस्तृप्यन्ताम्।

2. ऋषितर्पणम्- (पूर्व विधि से)

ॐमरीचिस्तृप्यताम्। ॐअत्रिस्तृप्यताम्। ॐअङ्गिरास्तृप्यताम्। ॐपुलस्त्यस्तृप्यताम्। ॐपुलहस्तृप्यताम्। ॐक्रतुस्तृप्यताम्। ॐवशिष्ठस्तृप्यताम्। ॐप्रचेतास्तृप्यताम्। ॐभृगुस्तृप्यताम्। ॐ नारदस्तृप्यताम्।

3. दिव्यमनुष्यतर्पणम्-

(उत्तराभिमुख होकर यज्ञोपवीत कण्ठ में धारण करें, गमछा भी कण्ठी की तरह हो, घुटना जमीन पर न होवे, यव मिश्रित जल से त्रिकुशा को उत्तराग्र करके प्रजापति तीर्थ अर्थात् दाहिने हाथ की कनिष्ठा के मूल से, 2-2 अञ्जलि जल देवें) ।

ततो निवीति (उपवीतं माला-इव कण्ठे धारणीयम्) उत्तराभिमुखावाहनकुशानुत्तराग्रान् कृत्वा पुष्पाक्षतैरावाहयेत्। ॐ सनकाद्या सप्तदिव्यमनुष्याऽत्रागच्छत।

ततः भूमौ यवान् विकीर्य प्रजापतितीर्थेन (कनिष्ठाङ्गुलिमूलेन) निम्नलिखितान् दिव्यमनुष्यान् प्रत्येकं द्विवारं तर्पयेत्।

ॐ सनकस्तृप्यताम्। (2) ॐ सनन्दनस्तृप्यताम्। (2) ॐ सनातनस्तृप्यताम्। (2) ॐकपिलस्तृप्यताम्। (2) ॐ आसुरिस्तृप्यताम्। (2) ॐ वोढुस्तृप्यताम्। (2) ॐ पञ्चशिखस्तृप्यताम्। (2)

4. दिव्यपितृतर्पणम्-

(दक्षिणाभिमुख हो यज्ञोपवीत और गमछा दाहिने कन्धे पर धारण करें, बायाँ घुटना जमीन पर हो, तिलाञ्जलि से त्रिकुशा को बीच से मोड़कर जड़ तथा अग्रभाग को तर्जनी और अँगूठे के मूल में रखकर पितृतीर्थ अर्थात् दाहिने हाथ की तर्जनी और अँगुष्ठ मूल से, 3-3 अञ्जलि जल देवें)।

ततो द्विगुणीकृत्य कुशत्रयमूलाग्रेन अञ्जलिना (ताम्रपात्रेण वा) पितृतीर्थेन तर्पयेत्।

ॐ कव्यवाडनलस्तृप्यताम्। इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।। 3
ॐ सोमस्तृप्यताम्। इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।। 3

ॐ यमस्तृप्यताम्। इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।। 3
ॐ अर्यमास्तृप्यताम्। इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।। 3
ॐ अग्निष्वात्ताः पितरस्तृप्यन्ताम्। इदं सतिलं जलं तेभ्यः स्वधा नमः।। 3
ॐ सोमपाः पितरस्तृप्यन्ताम्। इदं सतिलं जलं (गङ्गाजलं वा) तेभ्यः स्वधा नमः।। 3
ॐ बर्हिषदः पितरस्तृप्यन्ताम्। इदं सतिलं जलं (गङ्गाजलं वा) तेभ्यः स्वधा नमः।। 3

(इति प्रत्येकं त्रिवारमञ्जलिदानम्)

5. यमतर्पणम्-

(विधि पूर्वोक्त दिव्यपितृतर्पणवत्)

ॐ यमाय नमः (3)। ॐ धर्मराजाय नमः(3)। ॐ मृत्यवे नमः (3)। ॐ अन्तकाय नमः (3)। ॐ वैवस्वताय नमः (3)। ॐ कालाय नमः (3)। ॐ सर्वभूतक्षयाय नमः (3)। ॐ औदुम्बराय नमः (3)। ॐ दध्नाय नमः(3)। ॐ नीलाय नमः(3)। ॐ परमेष्ठिने नमः(3)। ॐ वृकोदराय नमः(3)। ॐ चित्राय नमः(3)। ॐ चित्रगुप्ताय नमः (3)।

6. मनुष्यपितृतर्पणम्

(पूर्वोक्त विधि से पितरों का आवाहन करें) ।

ततोऽपसव्यः दक्षिणमुखः त्रिकुशान् दक्षिणाग्रं कृत्वा वामजानुं भूमौ निधाय तिल-तुलसी-पुष्पैः कव्यवाडनलादयो दिव्यपितृन्नावाहयेत्।

ॐ कव्यवाडनलादयो दिव्यपितरोऽत्रागच्छत। ॐवसवो रुद्रादित्याचार्या अत्रागच्छत।
ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि। उशन्नुशतऽआ वह पितृन् हविषेऽअत्तवे।।
पितृनावाहयिष्ये, आवाह्य। ॐ आयन्तुनः पितरः सोम्यासोऽग्निष्वात्ताःपथिभिर्देवयानैः।
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान्।। (यजु.-19-58)

उपर्युक्तेन मन्त्रेण पितृन् नमस्कृत्य कुशाग्रान् उत्तराभिमुखं कृत्वा ताम्रपात्रे तिलान् संस्थाप्य पितृतीर्थेन प्रत्येकं वारत्रयं तर्पयेत्।

अमुक गोत्रोऽस्मत्पिता अमुकशर्मा वसुरूपस्तृप्यताम्। इदं सतिलं जलं तस्मै स्वधा नमः।।३
अमुकगोत्रोऽस्मत्पितामह अमुकशर्मा रुद्ररूपस्तृप्यताम्। इदं सतिलं जलं तस्मै स्वधा नमः।।
अमुकगोत्रोऽस्मत् प्रपितामह अमुकः वसुरूपस्तृप्यताम्। इदं सतिलं जलं तस्मै स्वधा नमः।।३
अमुकगोत्रा अस्मत्माता अमुकी देवी वसुरूपा तृप्यताम्। इदं सतिलं जलं तस्यै स्वधा नमः।।३
अमुकगोत्रा अस्मत्पितामही अमुकी देवी रुद्ररूपा तृप्यताम्। इदं सतिलं जलं तस्यै स्वधा नमः।। ३
अमुकगोत्रा अस्मत् प्रपितामही ... देवी आदित्यरूपा तृप्यताम्। इदं सतिलं जलं तस्यै स्वधा नमः।। ३

द्वितीयगोत्रतर्पणम्-

अमुकगोत्रोऽस्मन्मातामह अमुकशर्मा अत्रागच्छत। इदं सतिलं जलं तस्मै स्वधा नमः।।
अमुकगोत्रोऽस्मत् प्रमातामह अमुकशर्मा अत्रागच्छत। इदं सतिलं जलं तस्मै स्वधा नमः।।
अमुकगोत्रोऽस्मत् वृद्धप्रमातामह अमुकः अत्रागच्छत। इदं सतिलं जलं तस्मै स्वधा नमः।।

मन्त्रः-
आयन्तु नः पितरः सोम्यसोऽग्निष्वात्ताः पथिभिर्देवयानैः।
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान्।। (यजु.-19-58)

इति मन्त्रं कृताञ्जलिः पठेत्।

मन्त्रः- ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः।
असुं यऽईयुरवृकाऽऋतज्ञास्ते नोऽवन्तु पितरो हवेषु।। (यजु.-19-49)

ततः परं निम्नलिखितैः नवभिर्मन्त्रैः पितृतीर्थेन तिलाञ्जलिना तर्पयेत्।

अमुकगोत्रोऽस्मत्पिता अमुकशर्मा वसुरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः।

मन्त्रः- ॐ अङ्गिरसो नः पितरो नवग्वाऽअथर्वाणो भृगवः सोम्यासः।
तेषां वय ँ् सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम।। (यजु.-19-50)

अमुकगोत्रोऽस्मत्पिता अमुकशर्मा वसुरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः।

मन्त्रः- ॐ आयन्तु नः पितरः सोम्यसोऽग्निष्वात्ताः पथिभिर्देवयानैः।
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान्।। (यजु.-19-58)

अमुकगोत्रोऽस्मत्पिता अमुकशर्मा वसुरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः।

मन्त्रः-
ॐऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधास्थ तर्पयत मे पितृन्।।
(यजु.-2-34)

अमुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्ररूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः।

मन्त्रः- ॐ अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम्।।

अमुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्ररूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः।

मन्त्रः- ये चेह पितरो ये च नेह याँश्च विद्म याँ२ऽ उ च न प्रविद्म।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञ ँ् सुकृतं जुषस्व।। (यजु.-19-67)

अमुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्ररूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः।

मन्त्रः-
ॐ मधुवाताऽऋतायते मधुक्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः।। (यजु.-13-27)

अमुकगोत्रोऽस्मत् प्रपितामहोऽमुकः आदित्यरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः।

मन्त्रः-

ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवँ रजः। मधुद्यौरस्तुनः पिता।। (यजु.-13-28)

अमुकगोत्रोऽस्मत् प्रपितामहोऽमुकः आदित्यरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः।

मन्त्रः-

ॐ मधुमान्नो वनस्पतिर्मधुमाँ २ऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।। (यजु.- 13-29)

अमुकगोत्रोऽस्मत् प्रपितामहोऽमुकः आदित्यरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः।

मन्त्रः-

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्तपितरः पितरः शुन्धध्वम्।। (यजु.-19-36)

अमुकगोत्रोऽस्मत्पितृ-पितामह-प्रपितामहाः अमुकामुकशर्माणः तृप्यन्तामिदं जलं यथाविभागं युष्मभ्यं स्वधा नमः। (एवं सर्वत्र त्रिवारं जलाञ्जलिदानं कर्तव्यम्।)

पितृनमस्कारः-

ॐ नमो वः पितरो रसाय नमो वः पितरो शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वासऽआधत्त।। (यजु.- 2-32)

मातृतर्पणम्-

अमुकगोत्राऽस्मन्माता अमुकीदेवी वसुरूपा तृप्यतामिदं जलं तस्यै स्वधा नमः।। 3।।

अमुकगोत्राऽस्मत्पितामही अमुकीदेवी रुद्ररूपा तृप्यतामिदं जलं तस्यै स्वधा नमः।। 3।।

अमुकगोत्राऽस्मप्रपितामही अमुकीदेवी आदित्यरूपा तृप्यतामिदं जलं तस्यै स्वधा नमः।। 3।।

(ततः समूहरूपेण मातृ-पितामही-प्रपितामहीभ्यः त्रिजलाञ्जलिं दद्यात्।)

मातामहादितर्पणम्-

अमुकगोत्रोऽस्मन्मातामह अमुकशर्मा वसुरूपस्तृप्यतामिदं जलं तस्मै स्वधा नमः।। 3।।

अमुकगोत्रोऽस्मत् प्रमातामह अमुकशर्मा रुद्ररूपस्तृप्यतामिदं जलं तस्मै स्वधा नमः।। 3।।

अमुकगोत्रोऽस्मद् वृद्धप्रमातामह अमुकशर्मणे आदित्यरूपस्तृप्यतामिदं जलं तस्मै स्वधा नमः।। 3।।

(अत्रैव मन्त्रगुरु-श्वशुर-मातुल-ज्येष्ठकनिष्ठभ्राता-पितृव्यादीनां च स्व स्व गोत्रनामोच्चारणपूर्वकं प्रत्येकमेकैकमञ्जलिना तर्पयेत्।)

७. देवासुरयक्षनागादीनां तर्पणम्-

(सव्य विधि द्वारा तर्पण करे)

ततोपनिवीति (सव्यः) पूर्वाभिमुखः, पार्श्वे स्थितकुशाग्रान् पूर्वाभिमुखं कृत्वा देवतीर्थेन एकैकमञ्जलिं जलं तर्पयेत्। अथ मन्त्रः-

देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः। पिशाचा गुह्यकाः सिद्धाःकूष्माण्डास्तरवः खगाः।।
जलेचरा भूनिलया वाय्वाधाराश्च जन्तवः। तृप्तिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः।।

८. नरकस्थितजीवतर्पणम्-

(अपसव्य विधि से)

ततोऽपसव्यः दक्षिणाभिमुखः कुशमूलाग्रान् एकीकृत्य पितृतीर्थेन निम्नमन्त्रं पठित्वा एकाञ्जलिं सतिलं जलं दद्यात्।

नरकेषु समस्तेषु यातनासु च ये स्थिताः। तेषामाप्यायनायै तद् दीयते सलिलं मया।।
येऽबान्धवा बान्धवाश्च येऽन्यजन्मनि बान्धवाः। ते तृप्तिमखिला यान्तु यश्चास्मत्तोऽभिवाञ्छति।।
ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः । तेषां हि दत्तमक्षय्यमिदमस्तु तिलोदकम् ।।
आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः। तृप्यन्तु पितरः सर्वे मातृमातामहादयः।।
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्। आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम्।।

वस्त्रनिष्पीडनम्-

(गमछा को चार तह करके तिल जल रखकर निम्नलिखित मन्त्र पढ़कर बायें तरफ निचोड़ें) आवाहनकुशत्रयमञ्जलिकुशत्रयं च द्विगुणितं कृत्वा पात्रे क्षिपेत्।

मन्त्रः-

ये के चास्मत् कुले जाता अपुत्राः गोत्रिणो मृताः।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडितोदकम्।।

भीष्मतर्पणम्-

(भीष्मपितामह हेतु कुशोदक द्वारा पितृतीर्थ से तर्पण करें)

भीष्मपितामहस्य कृते पितृतीर्थेन कुशोदकेन तर्पयेत्।

व्याघ्रपादसगोत्राय सकृतिप्रवराय च। अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे।।
भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम्।।

ततः सव्यः पूर्वाभिमुखः आचम्य गायत्र्या ऋष्यादिकं विन्यस्य यथाशक्ति गायत्रीजपं कुर्यात्।

९. सूर्यार्घ्यदानम्-

(अर्घ्यपात्र को स्वच्छ कर पूर्वाभिमुख सव्य हो निम्नलिखित मन्त्रद्वारा सूर्यार्घ्य देवें)

नमो विवस्वते ब्रह्मन् ! भास्वते विष्णुतेजसे! । जगत्सवित्रे शुचये सवित्रे कर्मदायिने ।।

तत्पश्चात् परित्रमा करते हुए दिशाओं एवं उनके अधिष्ठित देवों को नमन करें ।

ॐ प्राच्यै नमः, ॐ इन्द्राय नमः । ॐ आग्नेय्यै नमः। ॐ अग्नये नमः । ॐ दक्षिणायै नमः। ॐ यमाय नमः। ॐ नैऋत्यै नमः। ॐ निऋतये नमः । ॐ प्रतीच्यै नमः। ॐ वरुणाय नमः । ॐ वायव्यै नमः। ॐ वायवे नमः । ॐ उदीच्यै नमः। ॐ कुबेराय नमः। ॐ ऐशान्यै नमः। ॐ ईशानाय नमः । ॐ ऊर्ध्वायै नमः। ॐ ब्रह्मणे नमः। ॐ अधरायै नमः। ॐ अनन्ताय नमः ।

(इस प्रकार परिक्रमा के अनन्तर निम्नलिखित मन्त्र से १-१ अञ्जलि देवें ।)

ॐब्रह्मणे नमः। ॐअग्नये नमः। ॐपृथिव्यै नमः। ॐओषधिभ्यो नमः । ॐवाचे नमः। ॐवाचस्पतये नमः। ॐमहद्भ्यो नमः । ॐविष्णवे नमः । ॐअद्भ्यो नमः। ॐअपाम्पतये नमः। ॐवरुणाय नमः ।

समर्पणम्-

ॐ अनेन यथाशक्तिकृतेन देवर्षिमनुष्यपितृतर्पणाख्येन कर्मणा भगवान् पितृस्वरूपी-जनार्दन-वासुदेवः प्रीयतां न मम। ॐ तत्सद् ब्रह्मार्पणमस्तु । ततः प्रार्थनामन्त्रः-

ॐ नमस्ते विष्णुरूपाय नमस्ते ब्रह्मरूपिणे। सहस्ररश्मये नित्यं नमस्ते सर्वतेजसे।।
नमस्ते रुद्रवपुषे नमस्ते भक्तवत्सले। जगत्स्वामिन्नमस्तेऽस्तु दिव्यचन्दनरूपधृक्।।
पद्मनाभ! नमस्तेऽस्तु कुण्डलाङ्गदभूषित!। नमस्ते सर्वलोकेश! सुप्तानां सप्रबोधक!।।
सत्यदेव! नमस्तेऽस्तु प्रसीद मम भास्कर!।दिवाकर! नमस्तेऽस्तु प्रभाकर! नमोऽस्तुते।।

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्यजातः पतिरेकऽआसीत्।
सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेष यत् ।स्मरणादेव तद्विष्णोः सम्पूर्ण स्यादिति श्रुतिः।।
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युताम्।।
यत्पादपङ्कजस्मरणात् यस्य नामजपादपि। न्यूनं कर्म भवेत् पूर्णं तं वन्दे साम्बमीश्वरम॥

ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः।

।। ततो विसर्जनम् ।। ।। इति तर्पण-विधिः।।

पितृदोषविमुक्तये प्रत्यहं पितृतर्पणं कर्तव्यम्। अथवा वर्षे आश्विनकृष्णपक्षे आवश्यमेव पितृतर्पणं विधेयम्। अनेन सन्तुष्टा पितरः सुखं शान्तिं समृद्धिञ्च प्रयच्छन्ति। तथा अतर्पिताः पितरः शरीरात् रुधिरं पिबन्ति।

अथ पुरश्चरणविचारः

तत्रादौ पुरश्चरणे स्थलनिर्णयः -

पर्वताग्रे नदीतीरे बिल्वमूले जलाशये। गोष्ठे देवालयेऽश्वत्थे उद्याने तुलसीवने ।।
पुण्यक्षेत्रे गुरोः पार्श्वे चित्तैकाग्र्यस्थलेऽपि च । पुरश्चरणकृन्मन्त्री सिद्ध्यत्येव विशेषतः ।।
काशीपुरी च केदारो महाकालोऽथ नासिकम् । त्र्यम्बकञ्च महाक्षेत्रं पञ्च द्वीपा इमे भुवि ।।
यज्ञागारे गवां गोष्ठे देवतायतनेषु च । पुण्यस्थानेषु सर्वेषु गङ्गातीरे विशेषतः ।।

अर्थात् ऊपर्युक्तस्थलेषु कृतं पुरश्चरणम् अनुष्ठानादिकं सिद्धिदं पुष्कलफलदायकञ्च भवति। अतः ग्रहाणां सर्वदोषोपद्रवशान्तये ऊपर्युक्तस्थलेषु मध्ये कतमस्मिन् स्थले अनुष्ठानादिकं विधेयमिति विशेषः ।

अथ पुरश्चरणे कालनिर्णयः -

ज्येष्ठाषाढौ भाद्रपदं पौषञ्च मलमासकम् । गुरुभार्गवमौढ्यादि वर्जयेच्च प्रयत्नतः ।।
अङ्गारशनिवारञ्च व्यतिपातञ्च वैधृतीम् । अष्टमीं नवमीं षष्ठीं चतुर्थीञ्च त्रयोदशीम् ।।
चतुर्दशीममावाश्यां प्रदोषञ्च तथा निशाम् । यामाग्निरुद्रसर्पेन्द्रवसुश्रवणजन्मभम् ।।
मेष-कर्क-तुला-कुम्भ-मकरालिकलग्नकम्। सर्वाण्येतानि वर्ज्यानि पुरश्चरणकर्मणि ।।
चन्द्रतारानुकूल्ये च शुक्लपक्षे विशेषतः । पुरश्चरणकं कुर्यान्मन्त्रसिद्धिः प्रजायते ।।

अपि च -

यदा वा जायते श्रद्धा यदा वित्तञ्च पुष्कलम् ।
दक्षिणावर्तगे सूर्ये कुर्यान्न तु मलिम्लुचे ।।

रोगोपद्रवोपशान्त्यर्थं केचन विचाराः-

रोगानां त्रिविधत्वं शास्त्रेषु उपलभ्यन्ते। यथा कर्मजा रोगाः, दोषोद्भवाः रोगाः, कर्मदोषोद्भवाश्च रोगाः। यदा औषधादिभक्षणेन ये रोगाः न शम्यन्ति तेषामुपशमनं धर्माचरण-दान-जप-होमार्चनादिभिः सम्भवतीति शास्त्रकाराणाममभिमतम्। तद्यथा -

रोगाः कर्मोद्भवाः केचित् केचिद्दोषसमुद्भवाः।कर्मदोषोद्भवाः केचित् एवं रोगास्त्रिधा स्मृताः ।।
ये रोगाः नैव शम्यन्ति कृते ह्यौषधकर्मणि । धर्मेणैवोपशाम्यन्ति ते रोगाः कर्मजाः स्मृताः।।
प्रायश्चित्तेऽपि विहिते न शाम्यति विनौषधम् । ये दृष्टहेतुसम्भूतास्ते रोगाः दोषजाः स्मृताः।।
येषां सर्वात्मना हानिर्भवेत्पुण्यैर्न केवलैः। न केवलौषधैर्वापि रोगास्ते कर्मदोषजा ।।
पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते। तत्शान्तिरोषधैर्दानैर्जपहोमार्चनादिभिः ।।
असाध्यस्यापि रोगस्य प्रायश्चित्तं समाचरेत् । सर्वरोगविनाशाय जपः कार्यो विशेषतः।।

।। हरिः ॐ ।।

अथ वर्धापन-विधिः

तत्रादौ वर्धापनकालनिर्णयो लिख्यते- वर्धापनं वर्षाभ्यन्तरे प्रतिमासं जन्मतिथौ कर्त्तव्यम् । वर्षानन्तरं प्रतिवर्षं जन्मतिथावेव कर्त्तव्यमिति धर्मशास्त्रीया व्यवस्था । तिथिद्वैधे यत्र जन्मर्क्षयोगः सा एव तिथिर्ग्राह्या । दिनद्वये जन्मनक्षत्रयोगसत्त्वासत्त्वयोरौदयिकी द्विमुहूर्त्ताधिका तिथिरेव ग्राह्या । द्विमुहूर्त्तन्यूनत्वे पूर्वातिथिस्तथा जन्ममासस्य अधिमासत्वे शुद्धमासे प्रत्याब्दिक-वर्धापनविधिः प्रतिपालनीय नत्वधिके मासे इति ।

अथ संक्षेपेण वर्धापनविधिर्लिख्यते । आयुराभिवृद्ध्यर्थं वर्षप्रवेशतिथौ वर्षवृद्धि-कर्म करिष्ये इति सङ्कल्प्य तिलोद्वर्त्तनपूर्वकं तिलोदकेन स्नात्वा तिलकादिकं विधाय गुरुं सम्पूज्य अक्षतादि-यथोपलब्धसामग्रिभिः निम्नलिखितक्रमेण देवताः प्रपूजयेत् ।

तत्रादौ स्वस्त्ययनादिकं विधाय कुलदेवतायै नमः इत्यनेन कुलदेवतामावाह्य ततः जन्मनक्षत्रं-पितरौ-प्रजापतिं-भानुं-विघ्नेशं-मार्कण्डेयं-व्यासं-जामदग्न्यरामं-अश्वत्थामानं-कृपं-बलिं-प्रहलादं-हनुमन्तं-बिभीषणं-षष्ठीञ्च नाम्नैव आवाह्य प्रपूजयेत् । पूजनं पञ्चोपचारेण षोडशोपचारेण वा कर्त्तव्यम् । तद्यथा-

आवाहनम्- लौकिकम् : आगच्छन्तु सुरश्रेष्ठ ! भवन्तवत्र स्थिराः समे ।
यावत्पूजां करिष्यामि तावत्तिष्ठन्तु सन्निधौ ।।
वैदिकम्-: ॐसहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।
सभूमिँ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ।। आवाहनार्थं पुष्पं सम०।
देव्याः- ॐ अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन ।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्।। आवाहनार्थं पुष्पाक्षतान् सम०।
आसनम्- लौ. : अनेकरत्नसंयुक्तं नानामणिगणान्वितम् ।
इमं हेममयं दिव्यमासनं प्रतिगृह्यताम् ।। पुष्पासनं सम०।।
(वै.) : ॐ पुरुषऽएवेदँ सर्वं यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।
प्रतिष्ठा -(लौ.) अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कश्चन।। प्राणप्रतिष्ठापूर्वकं नमस्करोमि।
(वै.) : ॐमनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञँ समिमं दधातु । विश्वेदेवास इहमादयन्तामोँ ३ प्रतिष्ठ ।।

पाद्यम्- (लौ.): ॐ गङ्गोदकं निर्मलञ्च सर्वसौगन्ध्य संयुतम् ।
पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ।।
(वै.): ॐएतावानस्य महिमातोज्यायाँश्च पुरुषः ।
पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि ।। पाद्यं सम०।।
अर्घ्यम्- (लौ.): गन्धपुष्पाक्षतैर्युक्तं मध्ये सम्पादितं मया ।
गृहाण भगवन् देव ! प्रसन्नो वरदो भव ।।
(वै.) : ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ।। अर्घ्यं सम०।।
आचमनम्- (लौ.) : कर्पूरेण सुगन्धेन वासितं स्वादु-शीतलम् ।
तोयमाचमनीयार्थं गृहाण परमेश्वर ।।
(वै.) : ॐ ततोव्विराडजायत व्विराजोऽअधिपूरुषः ।
सजातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ।। आचमनीयं जलं सम०।
जलस्नानम्- (लौ.) मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् ।
तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम् ।।
(वै.) : ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूस्ताँश्चक्रे वायव्या नारण्या ग्राम्याश्च ये ।। स्नानीयं जलं सम०।
दुग्धस्नानम्- (लौ.): कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ।।
(वै.): ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः।
पयस्वतीः प्रदिशः सन्तु मह्यम् ।। पयः स्नानं सम०।
दधिस्नानम्-(लौ.) : पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मया देव ! स्नानार्थं प्रतिगृह्यताम् ।।
(वै.) : ॐ दधिक्राब्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखाकरत्प्रणऽआयूँषितारिषत् । दधिस्नानं सम०।

घृतस्नानम्- (लौ.) : नवनीतं समुत्पन्नं सर्वसन्तोषकारकम् ।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ।।
(वै.) : ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतं वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहा कृतं वृषभवक्षि हव्यम् ।। घृतस्नानं सम०।
मधुस्नानम् (लौ.): पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ।।
(वै): ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्न्नः सन्त्वोषधीः । मधु नक्तमुतोषसो मधुमत्पार्थिवँ रजः ।
मधुद्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्म्मधुमाँ२ऽअस्तु सूर्यः माध्वीर्गावो भवन्तु नः ।। मधुस्नानं समर्पयामि ।
शर्करास्नानम् (लौ.) : इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम् ।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम् ।
(वै.) : ॐ अपाँ रसमुद्वयसँ सूर्ये सन्तँ समाहितम्। अपाँ रसस्य योरसस्तंवो गृह्णाम्युतममुपयाम गृहीतोसीन्द्रायत्वा जुष्टङ्गृह्णाम्येष ते योनि-रिन्द्राय त्वा जुष्टतमम्। शर्करास्नानं समर्पयामि ।
पञ्चामृतस्नानम्- (लौ.) : पयो दधि घृतं चैव मधु च शर्करान्वितम् ।
पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ।।
(वै.) ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः।
सरस्वती तु पञ्चधासो देशेऽभवत्सरित् ।। पञ्चामृतस्नानं सम ० ।
शुद्धोदकस्नानम्- (लौ.) : शुद्धं यत्सलिलं दिव्यं गंगाजलसमं स्मृतम् ।
समर्पितं मया भक्त्या शुद्धस्नानाय गृह्यताम्।। स्नानार्थं शुद्धोदकं सम०।
(वै.) ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्तऽआश्विनाः श्येतः श्येताक्षो रुणस्ते रुद्राय पशुपतये कर्णा यामा अवालिप्ता रौद्रा नभो रूपाः पार्जन्याः। स्नानार्थं शुद्धोदकं सम०।
वस्त्रम्- (लौ.) : शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ।।

(वै.) : ॐ तस्माद्यज्ञात् सर्व्वहुतऋचः सामानिजज्ञिरे ।
छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत । वस्त्रोपवस्त्रञ्च सम०।
यज्ञोपवीतम्- (लौ.): यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ।।
(वै.) : ॐ तस्मादश्वाऽअजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ।। यज्ञोपवीतं सम०।
चन्दनम्- (लौ.): श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ ! चन्दनं प्रतिगृह्यताम् ।।
(वै.) : ॐ त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमोराजा विद्वान्यक्ष्मादमुच्यत ।। चन्दनं सम०।
अक्षतम्- (लौ.): अक्षताश्च सुरश्रेष्ठ! कुङ्कुमाक्ताः सुशोभिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ।।
(वै.) : ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ।
अस्तोषत स्वभानवो विप्रानविष्ठया मतीयोजान्विन्द्रते हरी। अक्षतं सम०।
पुष्पाणि-(लौ.) : ॐमाल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि गृहाण परमेश्वर! ।।
(वै.) : ॐयत्पुरुषं व्यदधुः कतिधाव्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादा उच्येते ।। पुष्पाणि सम०।
पुष्पमाला-(लौ.): ॐमाल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि गृहाण परमेश्वर ! ।।
(वै.) : ॐ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरी र्व्वीरुधः पारयिष्ण्वः।। ॐपुष्पमालां सम०।
दूर्वा- (लौ.) : ॐदूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान् ।
आनीतांस्तव पूजार्थं गृहाण परमेश्वर ! ।।
(वै.) : ॐकाण्डात्काण्डाप्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनुसहस्रेण शतेन च ।। ॐदूर्वादलं सम०।

धूपः - (लौ.) : ॐवनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।
(वै.) : ॐ ब्राह्मणोऽस्यमुखमासीद् बाहूराजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्ध्याँ शूद्रोऽअजायत ।। धूपमाघ्रापयामि।
दीपः-(लौ.) : ॐ साज्यञ्च वर्त्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ।।
(वै.) : ॐचन्द्रमा मनसो जातश्चक्षोः सूर्य्योऽअजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।। ॐदीपं दर्शयामि।
नैवेद्यम्-(लौ.) : ॐशर्कराखण्डखाद्यानि दधिक्षीरघृतानि च ।
आहारं भक्ष्यभोज्यञ्च नैवेद्यं प्रतिगृह्यताम् ।।
(वै.) : ॐ नाभ्या आसीदन्तरिक्षँ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ऽअकल्पयन्।। ॐनैवेद्यं निवेदयामि।
ऋतुफलम्-(लौ.): ॐ इदं फलं मया देव! स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।।
(वै.) : ॐयाः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः।
बृहस्पति प्रसूतास्तानो मुञ्चन्त्वँ हसः।। ऋतुफलं सम०।
ताम्बूलम्- (लौ.) : ॐपूगीफलं महद् दिव्यं नागवल्लीदलैर्युतम् ।
एलालवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ।।
(वै.) : ॐयत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्मऽइध्मः शरद्धविः ।। ताम्बूलं सम०।
दक्षिणा- (लौ.):ॐहिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।
(वै.): ॐहिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत्।
सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।। दक्षिणाद्रव्यं सम०।
मन्त्रपुष्पाञ्जलिः (लौ) : ॐ श्रद्धया सिक्तया भक्त्या हार्दप्रेम्णा समर्पितः ।
मत्रपुष्पाञ्जलिश्चायं कृपया प्रतिगृह्यताम् ।।

(वै.) **ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।**
तेहनाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।। मन्त्रपुष्पाञ्जलिं सम०।
षष्ठ्यै दधिभक्तनैवेद्यं समर्पयेत् । पूजान्ते प्रार्थना -

चिरञ्जीवी यथा त्वं भो ! भविष्यामि तथा मुने ।
रूपवान्वित्तवांश्चैव श्रियायुक्तश्च सर्वदा ।।
मार्कण्डेयनमस्तेऽस्तु सप्तकल्पान्तजीवन ।
आयुरारोग्यसिद्ध्यर्थं प्रसीद भगवन् मुने ।।
चिरञ्जीवी यथा त्वं तु मुनीनां प्रवरो द्विज ! ।
कुरुष्व मुनिशार्दूल ! तथा मां चिरजीविनम् ।।
मार्कण्डेयमहाभाग ! सप्तकल्पान्तजीवन ।
आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव ।।

अथ षष्ठीप्रार्थना -

जय देवि ! जगन्मातर्जगदानन्दकारिणि ।
प्रसीद मम कल्याणि नमस्ते षष्ठीदेवते ।।
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्णुशिवैः सार्धं रक्षां कुर्वन्तु तानिमे ।।

ततस्तिलगुडमिश्रं पयः पिबेत् । तन्मन्त्रः-

सतिलंगुडसंमिश्रमञ्जल्यर्धमितं पयः ।
मार्कण्डेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये ।।

क्वचित् पूजितषोडशदेवताभ्यो नाम्ना प्रत्येकमष्टाविंशतिसंख्यकतिलहोमस्यापि विधानं प्राप्यते। तदनन्तरमावाहितदेवानां विसर्जनं, यज्ञाचार्यादाशीर्वादग्रहणम्। ततो यथेष्टं विप्रभोजनं, तेभ्यो दक्षिणादानञ्च दद्यादिति संक्षेपेण वर्धापनविधिः प्रदर्शितः ।

जन्मदिवसे पालनीयाः केचन नियमाः-

खण्डनं नखकेशानां मैथुनाध्वगमौ तथा ।
आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत् ।।
मृते जन्मनि सङ्क्रान्तौ श्राद्धे जन्मदिने तथा ।
अस्पृश्यस्पर्शने चैव नस्नायादुष्णवारिणा ।।

।।हरिः ॐ ।।

अथ काकविष्ठापतन-शान्तिविचारः-

आश्रयस्थो यदा काको विष्ठां सम्पद्यते यदि।
क्षीरवृक्षसमारूढस्तस्य सिद्धिरनेकधा।।१।।
शुष्कवृक्षसमारूढो विष्ठां सम्पद्यते यदा।
तस्य लक्ष्मीः क्षयं याति त्रिभिर्मासैर्न संशयः।।२।।
निरालम्बो[1] यदा काको विष्ठां सम्पद्यते यदि।
शिरसि पतति यस्य षण्मासस्तस्य मृत्युदः।।३।।
स्कन्धे वा यदि वा पृष्ठे विष्ठा पतति यस्य चेत्।
भ्रातृकष्टं भवेत्तस्य अथवा देहनाशनम्।।४।।
बाह्वोः पतति विष्ठा तु मित्रनाशो भवेत्तदा।
कुक्षौ पुत्रान्निहन्त्याशु उदरे रोगमादिशेत्।।५।।
गुह्ये पतति यस्यैव पुत्रनाशो भवेत्तदा।
ऊरुषु जानुनोर्यस्य काकविष्ठा प्रपद्यते।।६।।
तद्वाहनस्य नाशः स्याद्भयं राज्ञः सकाशतः।
चरणे प्रपतेद्यस्य देशत्यागो भवेत्तदा ।।७।।
निरालम्बो यदा काको विष्ठां श्वेतां करोति चेत्।
उत्तरतः पूर्वमायाति शत्रुनाशो भवेत्तदा।।८।।
याम्याः परां दिशि याति कृष्णां विष्ठां प्रपद्यते।
अब्दाभ्यन्तरतो मृत्युः सर्वनाशो भवेत्तदा।।९।।
यस्याङ्गे प्रपतेद्विष्ठा सचैलं स्नानमाचरेत्।
वस्त्रत्यागो भवेत्तस्य सद्यः शक्तिं करोति सः।।१०।।
धेनुरेका च दातव्या सर्वालङ्कारशोभिता।
पञ्चरत्नं च दातव्यं दक्षिणा चापि शक्तितः।।११।।
सतिलैर्मधुभिर्होमो ह्यष्टोत्तरशतं चरेत्।।

1. उड्डीयमानः आधाररहितः काकः।

अथ काकविष्ठाशान्तिप्रयोगः-

ॐअद्येत्यादि अमुकगोत्रः अमुकशर्म्माहं मम अमुकाङ्गे काकविष्ठा-पतनजनित-दुष्टदोषोपशान्त्यर्थं सचैलस्नानं करिष्ये तथा स्वस्तिवाचनादिपूर्वकं गणेशादि-षोडशमातृकापूजनं, कलशपूजनं, नवग्रहपूजनं च करिष्ये।

ततः सचैलं स्नात्वा स्नानवस्त्राणि परित्यज्य अन्यवासः परिधाय पूर्वोक्तेन विधिना स्वस्तिवाचनादि पूर्वाङ्गपूजनं विधाय (रक्षाविधानं कृत्वा) वेद्यां पञ्चभूसंस्कारपूर्वकम् अग्निं प्रतिष्ठाप्य वरदनामाग्निम् आवाह्य, ब्रह्मोपवेशनादि-पर्युक्षणान्तं कर्म कृत्वा आज्येन आघाराज्याहुतिः हुत्वा (मधु-तिल-सर्पिभिः अष्टोत्तरशतम्, काकविष्ठाशान्तिमन्त्रेण जुहुयात्)। तद्यथा-

काकविष्ठा-शान्तिमन्त्रः - ॐ हिरीटि भिरीटि काकचाण्डालाय स्वाहा। अनेन मन्त्रेण १०८ जुहुयात्। पुनः नाममन्त्रेण (काकाय स्वाहा इति नाममन्त्रेण) दिक् १० आहुतिं कुर्यात्।। ॐ अंशुभ्यो नमः स्वाहा अनेन १०, ॐ श्वपचेभ्यो नमः स्वाहा १०, ॐ वायसेभ्यो नमः स्वाहा १०, ॐ पतङ्गेभ्यो नमः स्वाहा १०, ॐ पापरोगिभ्यो नमः स्वाहा १० आहुतिं कुर्यात्। उत्तरतन्त्रं समाप्य स्वशक्त्या दक्षिणाञ्च दद्यात्। तिलपात्रदानविधिना तिलपात्रदानं कुर्यात्।

माषान्नदानम्- ॐ अद्येत्यादि अमुकगोत्रः अमुकराशिः अमुकशर्माऽहं मम अमुक अङ्गे काकविष्ठापतन-शान्तिनिमित्तक-दुष्टदोषोपशान्तये च इदं सद्रव्यं माषान्नम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।

प्रार्थना- **यस्मान्मधुवधे काले विष्णुदेहसमुद्भवाः।**
पितृणां तृप्तिदा माषा अतः शान्तिं प्रयच्छ मे।।

यदि शक्तः स्यात्तदा सप्तशतीपाठं कुर्यात्। जलजन्तुभ्योऽन्नं दद्यात्। अभिषेकमन्त्रेण कलशोदकैर्यजमानस्य मार्जनं कृत्वा-रक्षाबन्धन-तिलकमन्त्रपाठादि समापयेत्। ततः ब्राह्मणेभ्यः भोजनं दक्षिणादानं च कुर्यात्। एवं कृते तद्दोषपरिहारो भवति।

।। इति काकविष्ठापतनशान्तिः।।

केचन मन्त्रप्रयोगाः -

तत्रादौ विद्यावर्धकमन्त्रप्रयोगः- (1)-

ॐ नमो ॐ ह्रीं श्रीं क्लीं वद वद वाग्वादिनी बुद्धिं वर्धय ॐ ह्रीं नमः स्वाहा ।।

मन्त्रस्यास्य अष्टोत्तरसहस्रसंख्यकजपः ग्रहणावसरे क्रियते तदा अयं सिद्धो भवति। तदनन्तरं अष्टोत्तरशतं प्रतिदिनं जपः कर्त्तव्यः । अनेन अनुदिनमभ्यस्ता विद्या वृद्धिं गच्छति ।

विद्यावर्धकमन्त्रप्रयोगः- (2)

ॐ ह्रीं श्रीं माम वद वद वाग्वादिनी भगवती सरस्वती ऐं नमः स्वविद्यां देहि मम ह्रीं सरस्वती स्वाहा।।

मन्त्रस्यास्य अष्टोत्तरसहस्रसंख्यकजपः ग्रहणावसरे कर्त्तव्यः। तदनन्तरं एकविंशतिदिनं यावत् त्रिकालं अष्टोत्तरशतसंख्यक सश्रद्धं जपः कर्त्तव्यः। ततोऽनुदिनं अष्टोत्तरशतसंख्यकजपकर्म विद्याविवृद्धये सिद्धिदायकं भवति ।

धनवर्धकमन्त्रप्रयोगः- (3)

ॐ ह्रीं श्रीं क्रीं श्रीं क्रीं क्लीं श्रीं लक्ष्मी मम गृहे धनं पूरय पूरय चिन्तां दूरय दूरय स्वाहा।

मन्त्रस्यास्य अष्टोत्तरसहस्रसंख्यकजपः चतुर्विंशति दिनं यावत् क्रियते तदा मन्त्रोऽयं सिद्धिं गच्छति। तदनन्तरमनुदिनं धनविवृद्धये मालात्रयं जपः कर्त्तव्यः। सात्विकाचरणेन सह अस्य प्रयोगः कर्त्तव्यः ।

पत्निप्राप्त्यर्थं वैदिकमन्त्रप्रयोगः- (4)

ॐआगच्छत आगतस्य नाम गृह्णाम्यायतः। इन्द्रस्य वृत्रघ्नो वन्वे वासवस्य शतक्रतोः।।
येन सूर्यां सावित्रीमश्विनोहतुः पथा। तेन मामब्रवीद् भगो जायामा वहतादिति।।
यस्तेऽङ्कुशो वसुदानो बृहन्निद्र हिरण्ययः ।तेना जनीयते जायां मह्यं धेहि शचिपते।।

अथर्ववेदे अष्टमेऽनुवाके 6/82/1,2,3 ।

अस्य चतुःपञ्चाशतसहस्रजपेन तद्दशांशहवनतर्पणमार्जनेन मनोनुकूला पत्निप्राप्तिर्भवति।

पत्नीप्राप्त्ये पौराणिकमन्त्रप्रयोगः- (5)

ॐ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ।तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ।।

मन्त्रस्यास्य "दुर्गासप्तशती'' मन्त्रैः सम्पुटितैः पाठैः मनोनुकूलापत्नी प्राप्यते। पाठसंख्या-निर्द्धारणं जातकस्य जन्मपत्रस्थपत्नीसुखबाधकग्रहोपरि आधरितमस्ति ।

मनोनुकूलपतिप्राप्तये वैदिकमन्त्रप्रयोगः- (6)

ॐ त्र्यम्बकं यजामहे सुगन्धिम्पतिवेदनम् ।ऊर्वारुकमिवबन्धनादितोमुक्षीयमामुतः ।।

अस्य मन्त्रस्यानुष्ठानेन (सश्रद्धं शिवार्चनेन रुद्राभिषेकेन च) प्राप्ते काले मनोनुकूलपतिप्राप्तिर्भवति।

मनोनुकूलपतिप्राप्तये पौराणिकमन्त्रप्रयोगः- (7)

ॐ कात्यायिनि! महामाये ! महायोगिन्यधीश्वरि !
नन्दगोपसुतं देवि ! पतिं मे कुरु ते नमः ।।

अस्य मन्त्रस्यानुष्ठाने भगवत्याः जगदम्बायाः सम्मुखं दीपं प्रज्वाल्य कमलाक्षमालया एकपञ्चाशतसहस्रसंख्यकं जपकर्म कर्त्तव्यम्। तदनन्तरं तद्दशांशहवनं-मार्जनं-ब्राह्मणभोजनं-दक्षिणादानञ्च मनोनुकूलपतिप्राप्तये कर्त्तव्यम्।

कुपथगामी पति/पत्नीवशीकरणमन्त्रप्रयोगः- (8)

ॐ कामातुरे काममेखले विद्योषिणि नीललोचने ।
अमुकं मे वश्यं कुरु कुरु ह्रीं स्वाहा ।।

अत्र अमुकस्थाने पत्न्या वा पत्युर्नामोल्लेखः कर्त्तव्यः । सुमुहूर्त्ते प्रारभ्य चतुर्विंशति-सहस्रसंख्यकं जपकर्म भगवतीं पञ्चोपचारैः प्रपूज्य कर्त्तव्यम् ।

कुपथगामी पति/पत्नीवशीकरणवैदिकमन्त्रप्रयोगः- (9)

ॐ यथा नकुलो विच्छिद्य संदधात्यहिं पुनः ।
एवा कामस्य विच्छिन्नं सन्धेहि वीर्यावति ।।

अस्य जपसंख्या चतुर्विंशतिसहस्रमस्ति। विधानं विमृश्य कर्त्तव्यम्।

।। अथशारदोक्तमहामृत्युञ्जयजपविधिः।।

ॐ अस्य श्रीमहामृत्युञ्जयमन्त्रस्य वसिष्टऋषिः अनुष्टुप्छन्दः श्रीत्र्यम्बकरुद्रो देवता श्रीं बीजं ह्रीं शक्तिः मम यजमानस्य वा शरीरे सर्वारिष्ट निवृत्तिपूर्वकसकलमनोरथसिद्ध्यर्थे जपे विनियोगः ।

अथ ऋष्यादिन्यासः

ॐ वसिष्ठऋषये नमः शिरसि। अनुष्टुप्छन्दसे नमः मुखे। श्रीत्र्यम्बकरुद्र देवतायै नमः हृदये। श्रीं बीजाय नमः गुह्ये। ह्रीं शक्तये नमः पादयोः।।

अथ करन्यासः

ॐहौं ॐजूं सः भूर्भुवः स्वः त्र्यम्बकं ॐनमो भगवते रुद्राय शूलपाणये स्वाहा अङ्गुष्ठाभ्यां नमः।
ॐ हौं ॐ जूं सः भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय जीवय तर्जनीभ्यां स्वाहा ।
ॐ हीं ॐ जूं सः भूर्भुवः स्वः सुगन्धिम्पुष्टिवर्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा मध्यमाभ्यां वषट्।
ॐ हौं ॐ जूं सः भूर्भुवः स्वः उर्वारुकमिव बन्धनात् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय हां ह्रीं अनामिकाभ्यां हुम्।
ॐ हौं ॐ जूं सः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुः साममन्त्राय कनिष्ठिकाभ्यां वौषट् ।
ॐ हौं ॐ जूं सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष अघोरास्त्राय करतलकरपृष्ठाभ्यां फट् ।

एवं हृदयादि०

ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यम्बकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा हृदयाय नमः ।

ॐ हौं ॐ जूं सः भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय जीवय शिरसे स्वाहा।

ॐ हौं ॐ जूं सः भूर्भुवः स्वः सुगन्धिम्पुष्टिवर्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा शिखायै वषट्।

ॐ हौं ॐ जूं सः भूर्भुवः स्वः उर्वारुकमिव बन्धनात् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय ह्रां ह्रीं कवचाय हुँ ।

ॐ हौं ॐ जूं सः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुः साममन्त्राय नेत्रत्रयाय वौषट् ।

ॐ हौं ॐ जूं सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष अघोरास्त्राय अस्त्राय फट् ।।

।। अथ वर्णन्यासः ।।

ॐ त्र्यं नमः दक्षिणचरणाग्रे। बं नमः कं नमः यं नमः जां नमः दक्षिणचरणसन्धिचतुष्केषु। मं नमः वामचरणाग्रे। हे नमः सं नमः गं नमः धिं नमः वामचरणसन्धिचतुष्केषु। पुं नमः गुह्ये। ष्टिं नमः आधारे। वं नमः जठरे। र्द्धं नमः हृदये। नं नमः कण्ठे। ॐ नमः दक्षिणकराग्रे। उं नमः रुं नमः कं नमः मि नमः दक्षिणकरसन्धिचतुष्केषु। वं नमः वामकराग्रे। वं नमः धं नमः नां नमः मं नमः वामकरसन्धिचतुष्के। त्यो नमः वदने। मुं नमः ओष्ठयोः। क्षीं नमः घ्राणयोः। यं नमः दृशोः। मां नमः श्रवणयोः। मुं नमः भ्रुवोः। तां नमः शिरसि। पदन्यासः। त्र्यम्बकं शिरसि। यजामहे भ्रुवोः। सुगन्धि दृशोः। पुष्टिवर्धनम् मुखे। उर्वारुकं गण्डयोः। इव हृदये। बन्धनात्-जठरे, मृत्यो-गुह्ये। मुक्षीय-उर्वोः। मा जानुनोः। अमृतात् पादयोः॥

अथ ध्यानम्

हस्ताभ्यां कलशद्वयामृतरसेराप्लवयन्तं शिरो, द्वाभ्यां तो दधतं मृगाऽक्षवलये द्वाभ्यां वहन्तं परम्। अंकन्यस्तकरद्वयामृतघट कैलाशकान्तं शिवम्, स्वच्छाम्भोजगतं नवेन्दुमुकुटाभान्तं त्रिनेत्रं भजे॥१॥

इति ध्यात्वा मानसोपचारैः सम्पूज्य पूर्ववत् मालापूजनं पूर्ववत् मूलमन्त्र जपेत् ।।

।। मन्त्रस्वरूपम् ।।

हौं ॐ जूं सः भूर्भुवः स्वः त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्यो-र्मुक्षीय मामृतात् भूर्भुवः स्वरों जूं सः हौं ओम् ॥ १ ॥

जपान्ते प्रार्थना-

मृत्युञ्जय! महारुद्र! त्राहि मां शरणागतम् । जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥ १ ॥

तावकस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड । इति विज्ञाप्य देवेशं जपेन्मन्त्रं त्र्यम्बकम् ॥ २ ॥

बालस्य दृष्टिदोषादौ रक्षाविधिः- **भस्म गृहीत्वाऽभिमंत्रयेत् -**

वासुदेवो जगन्नाथः पूतनातर्जनो हरिः। रक्षंतु त्वरितं बालं मुंच मुंच कुमारकम् ॥

कृष्ण रक्ष शिशुं शंखमधुकैटभमर्दन। प्रातः संगवमध्याह्ने सायान्हे मुंच संध्ययोः ॥

महानिशि सदा रक्ष कंसारिष्टनिषूदन। महोरगान् पिशाचांश्च ग्रहान्मातृगणांस्तथा ॥

बालग्रहान्विशेषेण छिंधि छिंधि महाभयान्। त्राहि त्राहि हरे नित्यं त्वद्रक्षाभूषितं शिशुम्॥

इति भस्माभिमंत्र्यैव भूषयेत्तेन भस्मना। शिरो ललाटाद्यंगेषु रक्षां कुर्याद्यथाविधि ॥

रक्ष रक्ष महादेव नीलग्रीव जटाधर। ग्रहैस्तु सहितो रक्ष मुंच मुंच कुमारकम् ॥

अमुं मंत्रं भूर्जपत्रे विलिख्य तत्पत्रं बालस्य दक्षिणभुजे बध्नीयात् ।

बालरोदनपरिहारार्थं यंत्रमुक्तं मयूखे

षड्लमध्ये ह्रींकारस्तन्मध्ये शिशोर्नाम विलिख्य षटकोणेषु - ॐ लुलुव स्वाहा' इति मंत्रषडक्षराणि विलिख्य तद्बहिर्नेमिवद्वत्तद्वयं विलिख्य तद्बहिरधोमुखैरर्धचंद्रावेष्टय यंत्रदेवताभ्यो नमः' इति षोडशोपचारैः संपूज्य बालहस्ते बन्धीयात्

(बालग्रहशांत्यादिकं शांत्यादिग्रंथे द्रष्टव्यम्)

इति बालस्य रक्षाविधिः ॥

अथ बगलामुखी मन्त्र जपविधिः(मेरु तंत्रोक्त)

विनियोगः

'ॐ अस्य श्रीबगलामुखीमन्त्रस्य नारदऋषिः बृहतीछन्दः बगलामुखीदेवता शत्रूणां स्तम्भनार्थे जपे विनियोगः ।

षडङ्गन्यासः-

ॐ ह्रीं हृदयाय नमः, ॐ बगलामुखि शिरसे स्वाहा, ॐ सर्वदुष्टानां शिखायै वषट्, ॐ वाचं मुखं पदं स्तम्भय कवचाय हुम्, ॐ जिहवां कीलय नेत्रत्रयाय वौषट्, ॐ बुद्धिं विनाशय ह्रीं ॐ स्वाहा अस्त्राय फट् ॥

षडङ्गन्यासः

ह्रीं हृदयाय नमः, ॐ बगलामुखि शिरसे स्वाहा, ॐ सर्वदुष्टानां शिखायै वषट्, ॐ वाचंमुखं पदं स्तम्भय कवचाय हुं, ॐ जिहवां कीलय नेत्रत्रयाय वौषट्, ॐ बुद्धिं विनाशय ह्रीं ॐ स्वाहा अस्त्राय फट्।

अथ मन्त्रः

।। ॐ ह्रीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं जिह्वां स्तम्भय कीलय बुद्धिं विनाशय ह्रीं ॐ स्वाहाः।।

नक्षत्रसम्बन्धिनो वृक्षाः

ज्योतिषशास्त्रं लोकोपकारकं शास्त्रमस्तीत्यत्र नास्ति कश्चित् संशीतिलेशः। जन्मपत्रमाध्यमेन यथा जातकस्य प्रतिकूलतानिवृत्यर्थं तस्य प्रतिकूलग्रहस्य निर्द्धारणं कृत्वा तदनुकूलताप्राप्तये तस्य मन्त्रजपेन, तस्य पदार्थस्य दानेन तस्य ग्रहस्य व्रतेन, हवनादिषु तस्य ग्रहस्य समिधया हवनादिना च तद्ग्रहबाधायाः निवृत्तिः भवति, तथैव् नक्षत्रादीनां शान्तिप्रसङ्गे नक्षत्र-सम्बन्धिवृक्षाणामपि विद्यते किमपि वैशिष्ट्यम्। सुखैश्वर्यादीनां प्राप्तये नक्षत्रसम्बन्धिवृक्षाणां ज्ञानमपि नितान्तम् अपेक्षितं भवति। यतः कश्चिज्जनः स्वजन्मनक्षत्रसम्बन्धिवृक्षाणां सेवनं छेदन-भक्षणादिविधिना करोति तदा सः स्वजीवने सुखैश्वर्यादिकं नैव प्राप्नोति। जन्मनक्षत्रसम्बन्धिनः वृक्षाः सर्वदा पालनीयाः पूजनीयाः संवर्धनीयाश्च भवन्ति। तद्यथा रघुनाथसूरिविरचिते भोजन-कुतुहलाख्ये ग्रन्थे-

अथ वक्ष्यामि नक्षत्रवृक्षानागमचोदितान् ।
पूजनात् पुण्यदांश्चैव वर्धनात् पालनादपि ।।
विषद्रुधात्रीतरुहेमदुग्धाजम्बुस्तथा खादिरकृष्णवंशाः ।
अश्वत्थनागौ च वटः पलाशः प्लक्षस्तथाम्बष्ठतरुः क्रमेण ।।
बिल्वार्जुनौ चैव बिकङ्कतोऽथ सकेसराः शम्बरसर्जवञ्जुलाः ।
सपानसार्काश्च शमीकदम्बाः तथाम्रिनम्बौ मधुकद्रुमश्च ।।
अमी नक्षत्रदैवत्या वृक्षाः स्युः सप्तविंशतिः ।
अश्विन्यादिक्रमादेषामेषा नक्षत्रपद्धतिः ।।
यस्त्वेतेषामात्मजन्मर्क्षभाजां मर्त्यः कुर्याद् भेषजादीन् मदान्धः ।
तस्यायुष्यं श्रीः कलत्रञ्च पुत्राः नश्यन्त्येषां वर्धते वर्धनाद्यैः ।।

एतेषाम् अश्विन्यादिसप्तविंशतिनक्षत्रवृक्षाणां देवताः अपि ते एव भवन्ति ये नक्षत्राणां देवताः कथिताः विद्यन्ते । इदानी प्रसङ्गात् नक्षत्रवृक्षाणां तदधिपानाञ्चोल्लेखः क्रियते। तद्यथा-

क्र. सं.	नक्षत्रनाम	देवताः	वृक्षाः	क्र. सं.	नक्षत्रनाम	देवताः	वृक्षाः
१	**अश्विनी**	अश्विनीकुमार	विषद्रुः	१५.	**स्वातिः**	वायुः	अर्जुनः
२	**भरणी**	यम	धात्री	१६.	**विशाखा**	शक्राग्निः	विकङ्कतः
३	**कृतिका**	अग्नि	हेमदुग्धा	१७	**अनुराधा**	मित्र	केसरः
४	**रोहिणी**	धातृ	जम्बू	१८.	**ज्येष्ठा**	इन्द्र	शम्बरः
५	**मृगशिरा**	चन्द्रमाः	खादिर	१९.	**मूल**	निर्ऋति	सर्ज
६	**आर्द्रा**	रुद्रः	कृष्णखादिरः	२०.	**पू.षा.**	क्षीरः	वञ्जुलः
७	**पुनर्वसु**	अदितिः	वंशः	२१.	**उ.षा.**	विश्वेदेवा	पानकः
८	**पुष्य**	ईज्यः	अश्वत्थः	२२.	**श्रवणा**	विधिः	अर्कः
९	**अश्लेषा**	सर्पः	नागः	२३.	**धनिष्ठा**	गोविन्द	शमी
१०	**मघा**	पितरः	वटः	२४.	**शतभिषा**	वसु	कदम्बः
११	**पू.फा.**	भगः	पलाशः	२५.	**पू.भा.प.**	अजचरण सूर्यविशेषः	आम्रः
१२	**उ.फा.**	अर्यमा	प्लक्षः	२६.	**उ.भा.प.**	अहिर्बुध्न्य	निम्बः
१३	**हस्त**	रविः	अम्बष्ठः	२७.	**रेवती**	पूषा	महुआ
१४.	**चित्रा**	त्वाष्ट्रा	बिल्वः				

गृहस्य चतुर्दिक्षु वृक्षफलम्-

वृक्षाः दुग्धसकंटकाश्च फलिनस्त्याज्या गृहाद् दूरतः
शस्ते चम्पकपाटले च कदली जातीतथा केतकी ।
यामादूर्ध्वमशेषवृक्ष सुरजा छाया न शस्ता गृहे
पार्श्वे कस्य हरे रवीशपुरतो जैनानु चण्ड्याः क्वचिद् ।।

वास्तुराजवल्लभ-

अर्थात् दुग्धवाले वृक्ष, काँटेदार वृक्ष, फूलवाले वृक्ष, घर के समीप सुखदायक नहीं माने गये हैं । चम्पा, गुलाब, केला, चमेली, केतकी का वृक्ष शुभदायक माना गया है। एक प्रहर दिन (सूर्योदय के ३ घंटे) के पश्चाद् भी घर पर किसी वृक्ष की छाया शुभदायक नहीं मानी गई है। ब्रह्मा के मंदिर के पार्श्व भाग में, विष्णु, शिव, सूर्य मन्दिर के सामने, जैन-मन्दिर के पीछे किसी भी देवी मन्दिर के किसी भाग में गृह बनाना शुभदायक नहीं माना गया है।

।। हरिः ॐ ।।

सृष्टि-संरक्षण तथा ग्रहोपचार में वृक्षों का अवदान

प्रो. मदनमोहनपाठक
वरिष्ठ आचार्य, ज्योतिषविभाग
केन्द्रीयसंस्कृतविश्वविद्यालय, लखनऊ-परिसर

स्वतन्त्रता प्राप्ति के अनन्तर देश में भौतिक समृद्धि तो हुई परन्तु इसके साथ अशान्ति की भी अभिवृद्धि हुई है। इसके अनेक कारणों में से एक महत्त्वपूर्ण कारण है वृक्षों की कमी। जिस परिमाण में वृक्षों की कटाई हुई है उस परिमाण में वृक्षों को लगाया नहीं गया है। परिणामस्वरूप वर्षा की कमी हुई है। फसलों की सिचाई में मेघ का जल अमृत समान माना गया है। मेघ जल से सिंचित अन्न विविध रोगोपशामक तथा पुष्टि-वर्धक है। पर्यावरण के संरक्षण में भी वृक्षों/वनस्पतियों का महत्त्वपूर्ण स्थान है। विभिन्न कम्पनियों कारखानों, मोटर गाड़ियों से निकलने वाले कार्बन के अवशोषक के रूप में वृक्षों तथा वनस्पतियों की महती भूमिका है। महानगरों में वायु प्रदूषण चरम पर है। कारण वृक्षों का अभाव ही है।

धर्मार्जन पुरुषार्थ चतुष्टय में प्रथम पुरुषार्थ है। धर्म के विना अर्थ एवं काम अपवित्र हो जाता है। इन वृक्षों के महत्त्व को जानकर ही ऋषियों ने वृक्षारोपण को धर्मं के साथ जोड़ा था। वाराहपुराण में व्यास जी ने कहा है-

भूमिदानेन ये लोका गोदानेन च कीर्तिता।
ते लोकाः प्राप्यते पुंभिः पादपानां प्ररोपणे।।

अर्थात् व्यक्ति को भूमिदान तथा गोदान के सदृश पुण्य वृक्ष लगाने से प्राप्त होता है। वृक्ष रोपण करने वाला नरक गामी नहीं होता।

अश्वत्थमेकं पिचुमर्दमेकं (निम्ब)न्यग्रोध (वट)मेकं दश पुष्पजाती।
द्वे द्वे तथा दाड़िममातुलुंगे पञ्चाम्ररोपी नरकं न याति।।

अर्थात् एक पीपल, एक निम्ब, एक वरगद, दश पुष्पजाती, दो अनार, दो मातुलुंगा (एकप्रकार का निम्बू, Sitron) तथा पांच आम्रका पेड लगाने वाला कभी नरक नहीं जाता।

यथा सत्पुत्रः कुलमुद्धरेद्धि यथातिकृत्स्नानियमप्रयत्नात्।
तथात्रवृक्षाः फलपुष्पभूताः स्वं स्वामिनं नरकादुद्धरन्ति।।

अर्थात् जैसे सत्पुत्र अपने कुल का उद्धार करता है, उसी प्रकार फल-पुष्प युक्त वृक्ष अपने स्वामी को नरक से उद्धार कर देता है।

वृक्षरोपण फल- **अपुत्रस्य च पुत्रत्वं पादपा इह कुर्वते।**
यत्नेनापि च राजेन्द्र! अश्वत्थारोपणं कुरु।।
स ते पुत्रसहस्राणां कार्यमेकः करिष्यति।
धनी चाश्वत्थवृक्षेण अशोकः शोकनाशनः।।
प्लक्षो यज्ञप्रदः प्रोक्तो निम्बश्चासुप्रदः स्मृतः।
जम्बुकी नाकदा प्रोक्ता मर्यादा दाडिमी तथा।।
डुम्बरो रोगनाशाय पलाशो ब्रह्मदस्तथा।।
अर्कपुष्पा रोपकाणां नित्यं तुष्येद्दिवाकरः।।
श्रीवृक्षः शंकरो देवः पाटलायान्तु पार्वती।
शिंशपायामप्सरसः कुन्दे गन्धर्वसत्तमाः।।
विभितके दासवृद्धिः वकुलो दास्यदस्तथा।
अपत्यनाशकस्तालो वकुलः कुलवर्द्धनः।।
बहुभार्या नारिकेली द्राक्षः सर्वाङ्गसुन्दरः।
रतिप्रदा तथा केली केतकी सर्वनाशिनी।।
प्रतिष्ठां ते गमिष्यन्ति ये नराः प्लक्षरोपकाः।

पद्मपुराणे सृष्टिखण्डे वृक्षारोपणं नाम षडविंशोध्यायः।।

वृक्षनाम	फल	वृक्षनाम	फल
अश्वत्थ (पीपल)	धनप्राप्ति	पाटल	पार्वतीप्रीति
अशोक	शोकनाश	शिंशप (शीसम)	सुन्दर स्त्री प्राप्ति
प्लक्ष (पाकड़)	यज्ञप्रद	कुन्द	गन्धर्वप्रीति
निम्ब	प्राणप्रद	विभितक (बहेड़ा)	दासवृद्धि
जम्बुकी (जामुन)	स्वर्गप्रद	ताल	संततिनाश
दाडिमी (अनार)	मर्यादाप्राप्ति	वकुल (मौलसरी)	दासप्राप्ति
डुम्बर (गुलर)	रोगनाश	नारिकेल	बहुभार्या प्राप्ति
पलाश	ब्रह्मप्राप्ति	द्राक्षा (अंगूर)	सुन्दर शरीर प्राप्ति
अर्कपुष्प (अकवन)	सूर्यप्रीति	केली	रतिप्रद
बिल्व	शिवप्राप्ति	केतकी	सर्वनाशिनी

वृक्षों को लगाने से लाभ -

वृक्षगुल्मलतावल्यस्त्वक्सारास्तृणजातयः।
षडेते वृक्षजातीयास्तासां रोपे फलं शृणु ।।
यः पुमान् रोपयेद् वृक्षान् छायापुष्पफलोपगान् ।
सर्वसत्त्वोपभोगाय स याति परमां गतिम् ।।

वृक्ष-गुल्म-लता-वल्ली-त्वक्सार-तृण ये वृक्षों की छह प्रकार की जातियां कही गई हैं। जो व्यक्ति सभी प्राणियों के उपभोग के लिए छाया-पुष्प तथा फल वाले वृक्ष को लगाता है वह परं गति को प्राप्त करता है। अपि च-

छायापुष्पोपगांस्त्रिंशत् फलपुष्पद्रुमांस्तथा ।
रोपयित्वा दशाम्रांस्तु नरो न नरकं व्रजेत्।।
देवदानवगन्धर्वाः किन्नरोरगगुह्यकाः ।
पशुपक्षीमनुष्यांश्च संश्रयन्ति मुदा द्रुमान्।।
पुष्पैः सुरगणाः सर्वे फलैश्च पितरः सदा।
छायया मे मनुष्यास्तु पशुपक्षिमृगास्तथा।।
पुष्पोपगन्धांश्च फलोपगन्धान् यः पादपान् रोपयते मनुष्यः।
समृद्धदेशे वरवेश्मवेद्यां लभेददधिष्ठानवरं स विप्रः।।
तस्मात् सुबहवो वृक्षाः रोप्याः श्रेयोऽभिवाञ्छता।
पुत्रवत् परिपाल्याश्च ते पुत्राः धर्मतः स्मृताः।।

अर्थात् छाया फूल तथा फल वाले दस आम्र वृक्ष लगाने वाले को नरक नहीं मिलता। देव-दानव-गन्धर्व-किन्नर-सर्प-गुह्यक-पशु-पक्षी तथा मनुष्य ये सभी वृक्षों के आश्रित हैं। फूल वाले वृक्ष देवताओं को, फल वाले पितरों को, छायादार वृक्ष मनुष्य एवं पशु पक्षियों को संतुष्ट करते हैं। सुगन्धित फल फूल वाले वृक्ष लगाने वाला व्यक्ति सर्वसमृद्ध होता है तथा समृद्ध देश में सुप्रतिष्ठित होता है। एतदर्थ कल्याण चाहने वाले व्यक्ति को बहुत वृक्षों को लगा कर पुत्रवत् पालन करना चाहिए। क्योंकि वृक्षों को धर्मपुत्र कहा गया है। अतः वृक्षों को सन्तान की तरह पालन करने की बात कही गयी है।

वेद के नेत्र स्वरूप ज्योतिषशास्त्र में ग्रहशान्त्यर्थ उपचार हेतु ग्रह-नक्षत्र-सम्बन्धित वृक्षों को लगाना तथा उनके पूजन का विधान है। क्योंकि ग्रह-नक्षत्रों की अनुकूलता शुभ तथा ग्रह-नक्षत्रों की प्रतिकूलता अशुभ फल प्राप्ति का सूचक है। ग्रहों से सम्बन्धित वृक्षों/वनस्पतियों का वर्णन इस प्रकार है।

अर्कः पलाशः खदिरः अपामार्गोऽथ पीपलः।
औदुम्बरः शमी दूर्वा कुशाश्च समिधाः क्रमात्।।

अर्थात् सूर्य का वृक्ष अकवन, चन्द्र का पलाश, मंगल का खदिर, बुध का अपामार्ग, गुरु का पीपल, शुक्र का औदुम्बर, शनि का शमी, राहु का दूर्वा एवं केतु का कुशा निर्धारित किया गया है।

वर्तमान समय में समाज में जो अशान्ति, कलह तथा विभिन्न प्रकार की आधि-व्याधि (मानसिक एवं शारीरिक पीड़ा) देखने को मिलती है उसके समाधानार्थ इन नव-ग्रहों के वृक्षों को लगाकर उनकी सेवा करने से तत्तद् ग्रह सम्बन्धी रोगों/समस्याओं से छुटकारा मिल सकता है। यहाँ प्रसंग वश ग्रह सम्बन्धी रोगों/समस्याओं का संक्षेप में उल्लेख किया जाता है।

उसी सन्दर्भ में महर्षि पराशर ने ग्रह-समिधाओं का वर्णन किया है-

सूर्यस्यार्कः पलाशश्च विधोर्भूनन्दनस्य तु।
खदिरोऽथ बुधस्यैव-मपामार्ग उदीरितः।।
पिप्पलो हि गुरोर्जन्तु-फलः शुक्रस्य सम्मतः।
शनेः शमी त्वहेर्दूर्वा कुशाः केतोः समित् स्मृताः।।

बृहत्पाराशरहोराशास्त्रम्,ग्रहशान्त्याध्यायः, श्लोकसं २१-२२

उपर्युक्त इन नवग्रहों की समिधाओं का उपयोग ग्रह शान्त्यर्थ केवल हवन के लिए ही प्रयोग नहीं करना चाहिए अपितु इन वृक्षों/वनस्पतियों को रोप एवं सींच करके इनके सानिध्य में तत्तद् ग्रहों के मन्त्र जप करने से तत् सम्बन्धी ग्रह-बाधाओं से मुक्ति मिलती है। उदाहरण के लिए सूर्य नेत्र, हड्डी(अस्थि), राज्याधिकारी, पिता आदि का कारक माना जाता है। जिस किसी व्यक्ति को इनसे सम्बन्धित पीड़ा हो अर्थात् नेत्ररोग, अथवा हड्डी के रोग, राज्याधिकारियों की प्रतिकूलता तथा पिता के स्वास्थ्य तथा व्यवहार में प्रतिकूलता हो तो ज्योतिष शास्त्रोक्त मुहूर्त में किसी सुरक्षित स्थान में अकवन का पौधा लगा कर उसके सान्निध्य में वेदोक्त/तन्त्रोक्त मन्त्रों का अनुष्ठान करने/करवाने से तत् सम्बन्धित पीड़ा से मुक्ति मिलती है। इस प्रकार किसी भी मानसिक रोगी को न केवल चन्द्र मन्त्र का जप करना चाहिये अपितु ज्योतिष शास्त्रोक्त मुहूर्त में सुरक्षित स्थान पर पलाश वृक्ष लगा कर तद् ग्रह सम्बन्धित अनुष्ठान करने से मानसिक रोग से मुक्ति मिलती है। इस प्रकार अनुष्ठान करने से न केवल मानसिक रोग से मुक्ति अपितु चन्द्र जन्य अन्य समस्त बाधाओं से मुक्ति मिलती है।

मंगल की प्रतिकूलता से रक्तविकार, जैसे रक्तचाप आदि रोग, भ्रातृसुख में अभाव, कलह, काम-क्रोधजन्य विकार/रोग, जामाता से परेशानी, भूमि-भवन सम्बधित समस्यायें, परापवाद जैसे अपयश आदि की स्थिति में मंगल की आराधना के साथ मंगल के वृक्ष खदिर लगाकर उसकी सेवा के साथ मंगल का अनुष्ठान खदिर वृक्ष के सान्निध्य में करनी चाहिए।

बुध की प्रतिकूलता मे चर्मविकार, मातुल कष्ट, अथवा मातृकुल में विभिन्न परेशानियाँ, त्रिदोष(कफ-वात-पित्त)जन्य रोग, दन्त रोग, मुख रोग, निमोनिया ज्वर, व्रण, खांसी, ज्ञाति(कुल/खानदान) वर्ग, शिल्प से सम्बन्धित कार्य, वाणी जन्य विकार, घोडा, नपुंसकता जन्य व्याधि, गला से सम्बन्धित रोग, तान्त्रिक अभिचार, नाभि के आसन्न रोग, शूद्रकृत् उपद्रव, गुप्तांग में विकार, बहन से सम्बन्धित सहयोग/पीड़ा, गाँव में यश-अपयश/मान-प्रतिष्ठा आदि का विचार बुध से करते हैं। उपर्युक्त ग्रह बाधाओं के निवारण हेतु बुध की समिधा चिड़चिड़ी/अपामार्ग/लटजीरा(Irritant Plant) लगाने एवं इसकी सेवा करने, इसके सान्निध्य में बुध मन्त्र जप/अनुष्ठान करने से महान् लाभ होता है।

इस प्रकार गुरु की समिधा पीपल है। यह अहर्निश ऑक्सीजन का उत्सर्जन करने वाला वृक्ष है। **गुरु से विचारणीय विषय-** गुरु/अध्यापक की अनुकूलता/प्रतिकूलता, सन्तान के स्वास्थ्य एवं व्यवहार में बाधा, बड़े भाई से सम्बन्धित पीड़ा, गुरु का कोपभाजन होना, विद्यार्जन में बाधा, ब्राह्मण, गाय, कोष, प्रताप, कीर्ति, उदररोग, पितामह, अग्रज, राजा, विधिविभाग, राजसम्मान, उरु-स्थल, देव-कोप, मित्र, वक्तृत्व-शक्ति, वातज/कफज रोग, उहापोहशक्ति, पतिसुख आदि का विचार करते हैं। गुरु की प्रतिकूलता से मधुमेह रोग से पीड़ा होती है। उपर्युक्त की प्रतिकूलता में पीपल वृक्ष अवश्य लगाना चाहिए। जिस कन्या के पाणिग्रहण में बाधा उपस्थित हो उसे गुरुवार का व्रत करने, पीपल वृक्ष लगाने तथा उसके सान्निध्य में बृहस्पति का अनुष्ठान करने से आशातीत सफलता मिलती है।

शुक्र से विचारणीय विषय-दाम्पत्यसुखबाधा, स्त्रीजाति, ब्राह्मण, भार्या, मैथुन, आज्ञा, वाहनसुख, हाथी-घोडा, नृत्य-गीत, वाद्य, अभिनय, युवावस्था, तैराकी, नौकर, भाग्य, सौन्दर्य, सुकुमारता, राज्य, माला, इत्र, शारीरिक सौन्दर्य, अल्पभोजी, भोजन, विभिन्न कलाओं में निपुणता, वीर्य, जल क्रीडा, दिन में जन्म हो तो मातृकारक, शारीरिक निर्बलता एवं सप्तमभाव से सम्बन्धित सुख में बाधा होती है। शुक्रजन्य बाधा निवारण हेतु औदुम्बर(गुलर) वृक्ष लगाना चाहिए। इसके साथ में शास्त्रोक्त शुक्र-व्रत करने एवं मन्त्र-जप करने से तत्सम्बन्धी कष्ट का निवारण होता है।

शनि की प्रतिकूलता से विविध रोग, प्रतिपक्षियों का विरोध, जड़ता, आलस्य, विविध दुःख, चण्डाल आदि नीच जाति, वनवासी, स्वामी, आयु, नपुंसकता, दासता का कर्म, अधार्मिक कृत्य, पौरुष हीनता, मिथ्या भाषण, निकृष्ट विचार, दुष्टों से मैत्री, रात्रि में जन्म हो तो पितृकारक, कृषि द्वारा जीवन-यापन, लंगड़ापन, जिलाने का उपाय, पतन, भ्रमण, शल्य विद्या, तामसिक गुण, विष, कठोरता, भय, सार्वभौम सत्ता, बकरा, भैंस, कुत्ता, चोरी, चित्त की कठोरता, ह्रदय की उदारता, अपूर्णता, हीनता, अभाव, चमड़ा, पत्थर आदि पदार्थों का प्रतिनिधित्व के साथ त्रिक् भावों से विचारणीय विषयों का प्रतिनिधित्व करता है। किसी भी शारीरिक-पीड़ा हो तो शनि प्रदत्त पीड़ा समझनी चाहिए। इनके उपशमनार्थ शुभ मुहूर्त में शमी वृक्ष लगा कर उसकी सेवा करते हुए शास्त्रोक्त शनि का अनुष्ठान करने से अशुभ फल का ह्रास एवं शुभ फल की वृद्धि होती है।

राहु की प्रतिकूलता से दुष्ट स्त्री, अधार्मिक मनुष्य, द्युत, संध्या काल, विदेश गमन, अस्थि एवं पिलिहर रोग, असत्याचरण, इन्द्रजाल, तांत्रिक प्रयोग, नीचजन, वातज-कफज रोग, सकल गुप्त आचरण, लैब में भी रोगों का सुस्पष्ट ना होना, मृत्यु की प्रकृति, माता-पिता, नाना, खाँसी, श्वॉस सम्बन्धी रोग, प्रताप, कठोर भाषण, अभाव आदि से पीड़ा होती है।

इसी प्रकार केतु की प्रतिकूलता से कुत्ता, चिकित्सक, क्षय रोग, विविध पीड़ा, वातज रोग, तन्त्र-मन्त्र, व्रण, पत्थर, कुक्षी एवं नेत्र विकार, अज्ञानता, संसार से विरक्ति, शत्रुबाधा तथा मंगलग्रह से सम्बन्धित पीड़ा भी होती है। राहु केतु की समिधा क्रमशः दूर्वा एवं कुश है। राहु-केतु बाधा के उपशमनार्थ क्रमशः दूर्वा एवं कुश को लगाकर राहु-केतु के अनुष्ठान द्वारा ग्रहपीड़ा से मुक्ति मिलती है।

वनस्पतियों/वृक्षों के इन्हीं विशेषताओं को देखते हुए प्राचीन ऋषियों ने वृक्षों को लगाने के साथ इनके संरक्षण, संवर्धन करने की बात कही है। जैसे-

अतीतानागते चोभे पितृवंशं च भारत!।

तारयेद् वृक्षरोपी च तस्माद् वृक्षांश्च रोपयेत्।। महाभारत अनुशासनपर्व ५८/२६

अर्थात् हे भरतनन्दन! वृक्ष लगाने वाला पुरुष अपने मरे हुए पूर्वजों और भविष्य में होने वाले सन्तानों का तथा समस्त पितृकुल का उद्धार कर देता है। इसीलिए वृक्षों को अवश्य लगाना चाहिए।

इस प्रकार वृक्षों/वनस्पतियों को लगाकर न केवल हम अपना तथा अपने परिवार का अपितु सकल सृष्टि का कल्याण कर सकते हैं।

।। इति शम् ।।

संध्या-विधान

द्विजों के लिए सन्ध्या का विशेष महत्त्व है। जो व्यक्ति विधि पूर्वक प्रतिदिन सन्ध्या करते हैं, वे पापमुक्त होकर ब्रह्मलोक को प्राप्त करते हैं। सन्ध्या के लिए उत्तम समय ब्रह्ममुहूर्त कहा है। ब्रह्ममुहूर्त में जब आकाश में तारायें दिखती हो तो उसे प्रातःसन्ध्या के लिए उत्तम काल कहा गया है।

उत्तमा तारकोपेता मध्यमा लुप्ततारका।
अधमा सूर्यसहिता प्रातःसन्ध्या त्रिधा स्मृता।।
उतामा सूर्यसहिता मध्यमा लुप्तसूर्यका।
अधमा तारकोपेता सायं सन्ध्या त्रिधा स्मृता।।

सन्ध्या विधिः-

आचमन-'ॐ केशवाय नमः, ॐ नारायणाय नमः, ॐ माधवाय नमः' - इन तीन मन्त्रोंसे तीन बार आचमन करके '**ॐ हृषीकेशाय नमः**' इस मन्त्रको बोलकर हाथ धो लें।

विनियोग-मन्त्र-ॐ अपवित्रः पवित्रो वेत्यस्य वामदेव ऋषिः, विष्णुर्देवता, गायत्रीच्छन्दः हृदि पवित्रकरणे विनियोगः।' इस प्रकार विनियोग पढ़कर जल छोड़े' तथा निम्नलिखित मन्त्रसे मार्जन करे (शरीर एवं सामग्रीपर जल छिड़के)।

पुनः हाथ में जल लेकर गंगादि नदियों एवं प्रयागादि तीर्थों का स्मरण करते हुए निम्नलिखित मन्त्र से **जल शुद्धि** करे -

ॐगङ्गे च यमुने चैव गोदावरी सरस्वती ।
नर्मदे सिन्धु-कावेरी जलेऽस्मिन् सन्निधिं कुरु ।।

शरीर शुद्ध्यर्थ विनियोगः-

ॐ अपवित्रः पवित्रो वेत्यस्य वामदेवऋषिः विष्णुर्देवता गायत्रीछन्दः हृदि पवित्रकरणे विनियोगः ।

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
ॐ पुण्डरीकाक्षः पुनातु ३।

तदनन्तर विनियोग पढ़े- **ॐ पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः, सुतलं छन्दः, कूर्मो देवता आसनपवित्रकरणे विनियोगः।**

आसन पर निम्नलिखित मन्त्र पढकर जल छिड़के-

ॐ पृथ्वि ! त्वया धृता लोका देवि! त्वं विष्णुना धृता ।
त्वं च धारय मां देवि ! पवित्रं कुरु चासनम् ॥

हाथमें कुश, जल लेकर संध्याका संकल्प पढ़कर जल गिरा दे-

ॐविष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणोऽह्नि द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भारतवर्षे आर्यावर्तैकदेशान्तर्गते ......नगरे/ग्रामे/क्षेत्रे....संवत्सरे .... अयने ..... ऋतौ..... मासे.... पक्षे....तिथौ..... वासरे.... गोत्रः ..... शर्मा/वर्मा/ गुप्तोऽहं श्रुतिस्मृतिपुराणोक्त-फलप्राप्त्यर्थं आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं दैहिक-दैविक-भौतिक-त्रिविध-तापोपशमनार्थं धर्मार्थ-काम-मोक्षफल-प्राप्त्यर्थं सकलदुरितोपशमनार्थं नित्यकल्याणप्राप्त्यर्थं प्रातः/मध्याह्न/ सायंकालिक-सन्ध्योपासनकर्म करिष्ये ।

आचमन हेतु विनियोग-

ॐ ऋतं चेति माधुच्छन्दसोऽघमर्षण ऋषिरनुष्टुप् छन्दो भाववृत्तं दैवतमपामुपस्पर्शने विनियोगः।

आचमन करे-

ॐ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत। ततः समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथस्वः।

तत्पश्चात् दायें हाथ में जल लेकर बायें हाथ से ढ़ककर तीनबार गायत्री मन्त्र जपने के पश्चात् शरीर के चारों तरफ जल छोडें।

प्राणायाम करने से पूर्व विनियोग-

ॐकारस्य ब्रह्मा ऋषिर्दैवी गायत्री छन्दः अग्निः परमात्मा देवता शुक्लो वर्णः सर्वकर्मारम्भे विनियोगः।'

प्राणायाम करने हेतु विनियोग-

ॐ सप्तव्याहृतीनां विश्वामित्र-जमदग्नि-भरद्वाज-गौतम-अत्रि-वसिष्ठ-कश्यपा ऋषयो, गायत्री उष्णिक्-अनुष्टुप्-बृहती-पङ्क्ति-त्रिष्टुब्-जगति-छन्दांसि, अग्नि-वायु-आदित्य-बृहस्पति-वरुण-इन्द्र-विष्णवो देवता, अनादिष्टप्रायश्चित्ते प्राणायामे विनियोगः।

ॐ तत्सवितुरिति विश्वामित्रऋषिर्गायत्री छन्दः, सविता देवता प्राणायामे विनियोगः।

ॐ आपो ज्योतिरिरिति शिरसः, प्रजापतिऋषिर्यजुश्छन्दो ब्रह्माग्नि-वायु-सूर्या-देवताः प्राणायामे विनियोगः।

(क) प्राणायामके मन्त्र- फिर आँखें बन्द कर नीचे लिखे मन्त्रोंका प्रत्येक प्राणायाममें तीन-तीन बार (अथवा पहले एक बारसे ही प्रारम्भ करे, धीरे-धीरे तीन-तीन बारका अभ्यास बढ़ावे) पाठ करे।

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम्। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्।

प्रातःकाल नीचे लिखा विनियोग पढ़कर पृथ्वीपर जल छोड़ दे-

ॐ सूर्यश्च मेति नारायण ऋषिः, अनुष्टुप्छन्दः, सूर्यो देवता, अपामुपस्पर्शने विनियोगः'।

पश्चात् नीचे लिखे मन्त्रको पढ़कर आचमन करे-

(ग) प्राणायामके बाद आचमन-

ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यद्रात्रिया पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु। यत्किञ्च दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥

मार्जन- इसके बाद मार्जनका निम्नलिखित विनियोग पढ़कर बायें हाथमें जल लेकर कुशोंसे या दाहिने हाथकी तीन अँगुलियोंसे १ से ७ तक मन्त्रोंको बोलकर सिरपर जल छिड़के। ८वें मन्त्रसे पृथ्वीपर तथा ९ वें से फिर सिरपर जल छिड़के। तदर्थ विनियोगः-

ॐ आपो हि ष्ठेत्यादित्र्यृचस्य सिन्धुद्वीप ऋषिर्गायत्री छन्दः आपो देवता मार्जने विनियोगः।

मार्जन-

१. ॐ आपो हि ष्ठा मयोभुवः। २. ॐ ता न ऊर्जे दधातन। ३. ॐ महे रणाय चक्षसे। ४. ॐ यो वः शिवतमो रसः। ५. ॐ तस्य भाजयतेह नः। ६. ॐ उशतीरिव मातरः। ७. ॐ तस्मा अरं गमाम वः। ८. ॐ यस्य क्षयाय जिन्वथ। ९. ॐ आपो जनयथा च नः।

मस्तकपर जल छिड़कनेके विनियोग और मन्त्र - निम्नलिखित विनियोग पढ़कर बायें हाथमें जल लेकर दाहिने हाथसे ढक ले और निम्नलिखित मन्त्र पढ़कर सिरपर छिड़के।

विनियोग - **द्रुपदादिवेत्यस्य कोकिलो राजपुत्र ऋषिरनुष्टुप् छन्दः आपो देवताः शिरस्सेके विनियोगः।**

मन्त्र - **ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव।**
पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥

अघमर्षण और आचमनके विनियोग और मन्त्र- नीचे लिखा विनियोग पढ़कर दाहिने हाथमें जल लेकर उसे नाकसे लगाकर मन्त्र पढ़े और ध्यान करे कि 'समस्त पाप दाहिने नाकसे निकलकर हाथके जलमें आ गये हैं। उस जलको बिना देखे बायीं ओर फेंक दे। विनियोगः-

अघमर्षणसूक्तस्याघमर्षण ऋषिरनुष्टुप् छन्दो भाववृत्तो देवता अघमर्षणे विनियोगः।

मन्त्र- ॐ ऋतञ्च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत। ततः समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्वः॥

पुनः निम्नलिखित विनियोग करे-

अन्तश्चरसीति तिरश्चीन ऋषिरनुष्टुप् छन्दः आपो देवता अपामुपस्पर्शने विनियोगः।

फिर इस मन्त्रसे आचमन करे -

ॐअन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः।
त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम् ॥

सूर्यार्घ्य-विधि- सूर्यको अर्घ्य देनेके पूर्व निम्नलिखित विनियोग पढ़ें-

(क) '**ॐकारस्य ब्रह्मा ऋषिर्गायत्री छन्दः परमात्मा देवता अर्घ्यदाने विनियोगः।**'

(ख)**ॐ भूर्भुवः स्वरिति महाव्याहृतीनां परमेष्ठी प्रजापतिऋषि-र्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्यादेवताः अर्घ्यदाने विनियोगः।**'

(ग) **ॐ तत्सवितुरित्यस्य विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता सूर्यार्घ्यदाने विनियोगः ।**'

इस प्रकार विनियोग कर नीचे लिखा मन्त्र पढ़कर अर्घ्य दे।

'**ॐ भूर्भुवःस्वःतत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि। धियो यो नःप्रचोदयात्।**'

इस मन्त्रको पढ़कर '**ब्रह्मस्वरूपिणे सूर्यनारायणाय नमः**' कहकर अर्घ्य दे।

विशेष-यदि समय (प्रातः सूर्योदयसे तथा सूर्यास्तसे तीन घड़ी बाद) का अतिक्रमण हो जाय तो प्रायश्चित्तस्वरूप नीचे लिखे मन्त्रसे एक अर्घ्य पहले अथवा बादमें दे-

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्। ॐभूर्भुवः स्वः ॐ।

उपस्थान- सूर्यके उपस्थानके लिये प्रथम नीचे लिखे विनियोगोंको पढ़े-

(क) **उद्वयमित्यस्य प्रस्कण्व ऋषिरनुष्टुप् छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः ।**

(ख) **उदु त्यमित्यस्य प्रस्कण्व ऋषिर्निचृद्गायत्री छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः।**

(ग) **चित्रमित्यस्य कौत्स ऋषिस्त्रिष्टुप् छन्दः सूर्यो देवता, सूर्योपस्थाने विनियोगः।**

(घ) **तच्चक्षुरित्यस्य दध्यङ्ङाथर्वण ऋषिरक्षरातीतपुरउष्णिक्छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः।**

सूर्योपस्थान के मन्त्र -

(क) **ॐ उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्।**
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥

(ख) ॐ उदु त्यं जातवेदसं देवं वहन्ति केतवः ॥ दृशे विश्वाय सूर्यम्।

ग) ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षग्वं सूर्य आत्मा जगतस्तस्थुषश्च।॥

(घ) ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतग्वं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ।

गायत्री-जपका विधान-

षडङ्गन्यास-गायत्री मन्त्र-जपके पूर्व षडङ्गन्यास करे। अतः आगे लिखे एक-एक मन्त्रको बोलते हुए अंगोंका स्पर्श करे-

१) ॐ हृदयाय नमः (दाहिने हाथकी पाँचों अँगुलियोंसे हृदयका स्पर्श करे)।

(२) ॐ भूः शिरसे स्वाहा (मस्तकका स्पर्श करे)।

(३) ॐ भुवः शिखायै वषट् (शिखाका अँगूठेसे स्पर्श करे)।

(४) ॐ स्वः कवचाय हुम् (दाहिने हाथकी अँगुलियोंसे बायें कन्धेका और बायें हाथकी अँगुलियोंसे दायें कन्धेका स्पर्श करे)।

(५) ॐ भूर्भुवः स्वः नेत्राभ्यां वौषट् (नेत्रोंका स्पर्श करे)।

(६) **ॐ भूर्भुवः स्वः अस्त्राय फट्** (बायें हाथकी हथेलीपर दायें हाथको सिरसे घुमाकर मध्यमा और तर्जनीसे ताली बजाये)।

प्रातःकाल ब्रह्मरूपा गायत्रीमाताका ध्यान -

ॐबालां विद्यां तु गायत्रीं लोहितां चतुराननाम्। रक्ताम्बरद्वयोपेतामक्षसूत्रकरां तथा॥
कमण्डलुधरां देवीं हंसवाहनसंस्थिताम्। ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम् ॥

मन्त्रेणावाहयेद्देवीमायान्तीं सूर्यमण्डलात्।
गायत्री का आवाहन विनियोग-

तेजोऽसिति धामनामासीत्यस्य च परमेष्ठी प्रजापति ऋषिः यजुस्त्रिष्टुबुष्णिहौ छन्दसि आज्यं देवता गायत्र्यावाहने विनियोगः।

गायत्री का आवाहन-मन्त्र-

ॐ तेजोऽसि शुक्रमस्यमृतमसि।
धामनामासि प्रियं देवानामना धृष्टं देवयजनमसि।

गायत्रीदेवीका उपस्थान (प्रणाम) हेतु विनियोग-

गायत्र्यसीति विवस्वान् ऋषिः स्वराण्महापङ्क्तिश्छन्दः परमात्मा देवता गायत्र्युपस्थाने विनियोगः।

गायत्रीदेवीका उपस्थान (प्रणाम) हेतु मन्त्र-

ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि।
न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदो मा प्रापत्।

[गायत्री-उपस्थानके बाद गायत्री-शापविमोचनका तथा गायत्री-मन्त्र-जपसे पूर्व चौबीस मुद्राओंके करनेका भी विधान है, परन्तु नित्य सन्ध्या-वन्दनमें अनिवार्य न होनेपर भी इन्हें जो विशेषरूपसे करनेके इच्छुक हैं, उनके लिये यहाँ पर दिया जा रहा है।]

गायत्री-शापविमोचन-

(ब्रह्मा, वसिष्ठ, विश्वामित्र और शुक्रके द्वारा गायत्री अभिशप्त है। अतः शाप निवृत्यर्थ शाप विमोचन करना चाहिए)।

(१) ब्रह्मा शाप विमोचन विनियोग- **ॐ अस्य श्रीब्रह्म-शाप-विमोचन-मन्त्र ब्रह्मा ऋषिर्भुक्ति-मुक्ति-प्रदा ब्रह्मशाप विमोचनी गायत्रीशक्तिर्देवता, गायत्रीछन्दः, ब्रह्मशापविमोचने विनियोगः।**

मन्त्रः-

ॐ गायत्री ब्रह्मेत्युपासीत यद्रूपं ब्रह्मविदो विदुः।
तां पश्यन्ति धीराः सुमनसो वाचमग्रतः।।

ॐ वेदान्तनाथाय विद्महे हिरण्यगर्भाय धीमहि। तन्नो ब्रह्म प्रचोदयात्।। ॐ देवि! गायत्रि! त्वं ब्रह्मशापाद् विमुक्ता भव।

इसके बाद एक आचमनी जल गिरावे।

(२)वसिष्ठ-शापविमोचन विनियोग- **ॐ अस्य श्रीवसिष्ठ-शापविमोचन-मन्त्रस्य निग्रहानुग्रहकर्ता वसिष्ठ ऋषिर्वसिष्ठानुगृहीता गायत्री शक्तिर्देवता विश्वोद्भवा गायत्री छन्दः वसिष्ठशापविमोचनार्थं जपे विनियोगः।**

मन्त्रः-

ॐ सोऽहमर्कमयं ज्योतिरात्मज्योतिरहं शिवः।
आत्मज्योतिरहं शुक्रः सर्वज्योतीरसोऽस्म्यहम् ॥

योनिमुद्रा दिखाकर तीन बार गायत्री जपे।

ॐ देवि ! गायत्रि ! त्वं वसिष्ठशापाद्विमुक्ता भव।

इसके बाद एक आचमनी जल गिरावे।

(३) विश्वामित्र-शापविमोचन-विनियोग-

ॐ अस्य श्रीविश्वामित्रशापविमोचनमन्त्रस्य नूतनसृष्टिकर्ता विश्वामित्रऋषि-र्विश्वामित्रानुगृहीता गायत्री शक्तिर्देवता वाग्देहा गायत्री-छन्दः विश्वामित्रशापविमोचनार्थं जपे विनियोगः।

मन्त्रः- **ॐ गायत्रीं भजाम्यग्निमुखीं विश्वगर्भां यदुद्भवाः।**
देवाश्चक्रिरे विश्वसृष्टिं तां कल्याणीमिष्टकरीं प्रपद्ये॥

ॐ देवि! गायत्रि! त्वं विश्वामित्रशापाद्विमुक्ता भव। इसके बाद एक आचमनी जल गिरावे।

(४) शुक्र-शापविमोचन-विनियोगः-

ॐ अस्य श्रीशुक्रशापविमोचनमन्त्रस्य श्रीशुक्रऋषिः अनुष्टुप्छन्दः देवी गायत्रीदेवता शुक्रशापविमोचनार्थं जपे विनियोगः।

मन्त्रः-

ॐ सोऽहमर्कमयं ज्योतिरर्कज्योतिरहं शिवः ।
आत्मज्योतिरहं शुक्रः सर्वज्योतीरसोऽस्म्यहम्।।

ॐ देवि! गायत्रि! त्वं शुक्रशापाद्विमुक्ता भव।

प्रार्थना- ॐ अहो देवि! महादेवि! सन्ध्ये! विद्ये! सरस्वति! ।

अजरे! अमरे! चैव ब्रह्मयोनिर्नमोऽस्तुते।।

ॐ देवि! गायत्रि! त्वं ब्रह्मशापाद् विमुक्ता भव। वशिष्ठ-शापाद् विमुक्ता भव। विश्वामित्रशापाद्विमुक्ता भव। शुक्रशापाद्विमुक्ता भव।

इसके बाद एक-एक करके चार बार आचमनी से जल गिरावे।

जपके पूर्वकी चौबीस मुद्राएँ-

सुमुखं सम्पुटं चैव विततं विस्तृतं तथा।

द्विमुखं त्रिमुखं चैव चतुष्पञ्चमुखं तथा॥

षण्मुखाऽधोमुखं चैव व्यापकाञ्जलिकं तथा।

शकटं यमपाशं च ग्रथितं चोन्मुखोन्मुखम्॥

प्रलम्बं मुष्टिकं चैव मत्स्यः कूर्मो वराहकम्।

सिंहाक्रान्तं महाक्रान्तं मुद्‌गरं पल्लवं तथा ॥

एता मुद्राश्चतुर्विंशज्जपादौ परिकीर्तिताः।

गायत्री-मन्त्र जप हेतु विनियोग-

ॐकारस्य ब्रह्मा ऋषिर्गायत्री छन्दः परमात्मा देवता, ॐ भूर्भुवः स्वरिति महाव्याहृतीनां परमेष्ठी प्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवताः, ॐ तत्सवितुरित्यस्य विश्वामित्रऋषिर्गायत्री छन्दः सविता देवता जपे विनियोगः।

तदनन्तरगायत्रीमन्त्रका१मालाजपकरे।१मालानहोतो१०बारजपकेअनन्तर जप निवेदित करे-

अनेन गायत्रीजपकर्मणा सर्वान्तर्यामी भगवान् नारायणः प्रीयतां न मम।

गायत्री देवीका विसर्जन -

विनियोग- **'उत्तमे शिखरे' इत्यस्य वामदेव ऋषिरनुष्टुप् छन्दः गायत्री देवता गायत्रीविसर्जने विनियोगः ।**

गायत्रीके विसर्जनका मन्त्र -

ॐ उत्तमे शिखरे देवी भूम्यां पर्वतमूर्धनि।

ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि ! यथासुखम् ॥ सन्ध्योपासन कर्म समर्पण -

ॐ अनेन सन्ध्योपासनेन कर्मणा श्रीपरमेश्वरः प्रीयतां न मम। ॐ तत्सत् श्रीब्रह्मार्पणमस्तु। तदनन्तर भगवान का पुनः स्मरण करें-

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।

न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ।।

श्रीविष्णवे नमः ३। श्रीविष्णुस्मरणात् परिपूर्णता अस्तु।

मध्याह्न सन्ध्या

मध्याह्न सन्ध्या विनियोग-

ॐ आपः पुनन्त्विति ब्रह्मा ऋषिर्गायत्रीछन्दः आपो देवता अपामुपस्पर्शने विनियोगः। आचमन -

ॐ आपः पुनन्तु पृथ्वीं पृथ्वी पूता पुनातु माम्।

पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम्। यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम। सर्वं पुनन्तु मामापोऽसतां प्रतिग्रहग्वं स्वाहा।

विष्णुरूपा गायत्री का ध्यान-

ॐ मध्याह्ने विष्णुरूपां च तार्क्ष्यस्थां पीतवाससाम् ।

युवतीं च यजुर्वेदां सूर्यमण्डलसंस्थिताम् ।।

सायं सन्ध्या

नीचे लिखा विनियोग पढ़कर पृथ्वीपर जल छोड़ दे-

अग्निश्च मेति रुद्रऋषिः, प्रकृतिश्छन्दः, अग्निर्देवता, अपामुपस्पर्शने विनियोगः'।

(ग) प्राणायामके बाद आचमन-

ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु। यत्किञ्च दुरितं मयि इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ॥

पुनः पश्चिमाभिमुख होकर तीन बार अर्घ्य देवे। तदनन्तर शिवरूपागायत्री ध्यान-

ॐ सायाह्ने शिवरूपां च वृद्धां वृषभवाहिनीम्।

सूर्यमण्डलमध्यस्थां सामवेदसमायुताम्।।

।।ॐ।।

अथ प्रातःस्मरणीयगणेशस्तोत्रम्

ॐ प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्।
भक्तावासं स्मरेन्नित्यमायुष्कामार्थसिद्धये।१।

प्रथमं वक्रतुण्डञ्च एकदन्तं द्वितीयकम् ।।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ।।२।।

लम्बोदरं पञ्चमञ्च षष्ठं विकटमेव च ।।
सप्तमं विघ्नराजञ्च धूम्रवर्णं तथाष्टमम् ।।३।।

नवमं भालचन्द्रञ्च दशमन्तु विनायकम् ।।
एकादशं गणपतिं द्वादशन्तु गजाननम् ।।४।।

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः।।
नास्ति विघ्नभयं तस्य सर्वसिद्धिं लभेद् ध्रुवम् ।।५।।

विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।।
पुत्रार्थी लभते पुत्रान् मोक्षार्थी लभते गतिम् ।।६।।

जपेद् गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् ।।
संवत्सरेण सिद्धिञ्च लभते नात्र संशयः ।।७।।

अष्टभ्यो ब्रह्मणेभ्यश्च लिखित्वा यः समर्पयेत्।।
तस्य विद्या भवेत् सद्यो गणेशस्य प्रसादतः।। ८।।

श्रीनारदपुराणे सङ्कष्टनाशनं नाम गणेशस्तोत्रं सम्पूर्णम् ।।

अथनवग्रहस्तोत्रम्

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम्।
तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ।।१।।
दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ।।२।।
धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् ।।
कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ।।३।।
प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ।।४।।
देवानां च ऋषीणां च गुरुं काञ्चनसंनिभम् ।।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ।।५।।
हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ।।६।।
नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् ।।
छायामार्त्तण्डसम्भूतं तं नमामि शनैश्चरम् ।।७।।
अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ।।
सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम्।।८।।
पलाशपुष्पसङ्काशं तारकाग्रहमस्तकम् ।।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ।।९।।

इति व्यासमुखोद्गीतं यः पठेत् सुसमाहितः।। दिवा वा यदि वा रात्रौ विघ्नशान्तिर्भविष्यति ।।१०।।
नरनारीनृपाणाञ्च भवेद्दुःस्वप्ननाशनम् ।। ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम् ।। ११।।
ग्रहनक्षत्रजाः पीडास्ताडकाग्निसमुद्भवाः ।। ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ।।

।। महर्षिव्यासविरचितं नवग्रहस्तोत्रं सम्पूर्णम् ।।

नवग्रहाणां समिधाः-अर्कः पलाशः खदिरो ह्यपामार्गश्च पीपलः ।
उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ।।

याज्ञवल्क्यसंहिता-१/३०२

अथ कनकधारास्तोत्रम्

अङ्गं हरेःपुलकभूषणमाश्रयन्ति भृङ्गाङ्गनेव मुकुलाभरणं तमालम् ।
अङ्गीकृताखिलविभूतिरपाङ्गलीला माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः।।१।।

मुग्धा मुहुर्विदधती वदने मुरारेः प्रेमत्रपाप्रणिहितानि गतागतानि ।
माला दृशोर्मधुकरीव महोत्पले या सा मे श्रियं दिशतु सागरसम्भवायाः।२।।

विश्वामरेन्द्रपदविभ्रमदानदक्ष-मानन्दहेतुरधिकं मुरविद्विषोऽपि ।
ईषन्निषीदतु मयि क्षणमीक्षणार्ध-मिन्दीवरोदरसहोदरमिन्दिरायाः।।३।।

आमीलिताक्षमधिगम्य मुदा मुकुन्द-मानन्दकन्दमनिमेषमनङ्गतन्त्रम्।
आकेकरस्थितकनीनिकपक्ष्मनेत्रं भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः।।४।।

बाह्वन्तरे मधुजितः श्रितकौस्तुभे या हारावलीव हरिनीलमयी विभाति ।
कामप्रदा भगवतोऽपि कटाक्षमाला कल्याणमावहतु मे कमलालयायाः।।५।।

कालाम्बुदालिललितोरसि कैटभारे-र्धाराधरे स्फुरति या तडिदङ्गनेव।
मातुः समस्तजगतां महनीयमूर्ति-र्भद्राणि मे दिशतु भार्गवनन्दनायाः।।६।।

प्राप्तं पदं प्रथमतः किल यत्प्रभावान्-माङ्गल्यभाजि मधुमाथिनि मन्मथेन ।
मय्यापतेत्तदिह मन्थरमीक्षणार्धं मन्दालसं च मकरालयकन्यकायाः।।७।।

दद्याद्दयानुपवनो द्रविणाम्बुधारा-मस्मिन्नकिञ्चनविहङ्गशिशौ विषण्णे ।
दुष्कर्मघर्ममपनीय चिराय दूरं नारायणप्रणयिनीनयनाम्बुवाहः।।८।।

इष्टा विशिष्टमतयोऽपि यया दयार्द्र दृष्ट्यात्रिविष्टपपदं सुलभं लभन्ते ।
दृष्टिः प्रहृष्टकमलोदरदृप्तिरिष्टां पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः ।।९।।

गीर्देवतेति गरुडध्वजसुन्दरीति शाकम्भरीति शशिशेखरवल्लभेति ।
सृष्टिस्थितिप्रलयकेलिषु संस्थितायै तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै।।१०।।

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै रत्यै नमोऽस्तु रमणीयगुणार्णवायै।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै।११।।

नमोऽस्तु नालीकनिभाननायै नमोऽस्तु दुग्धोदधिजन्मभूत्यै ।
नमोऽस्तु सोमामृतसोदरायै नमोऽस्तु नारायणवल्लभायै ।।१२।।

सम्पत्कराणि सकलेन्द्रियनन्दनानि
साम्राज्यदानविभवानि सरोरुहाक्षि।
त्वद्वन्दनानि दुरिताहरणोद्यतानि
मामेव मातरनिशं कलयन्तु मान्ये! ।।१३।।

यत्कटाक्षसमुपासनाविधिः
सेवकस्य सकलार्थसम्पदः।
सन्तनोति वचनाङ्गमानसै-
स्त्वां मुरारिहृदयेश्वरीं भजे।।१४।।

सरसिजनिलये सरोजहस्ते धवलतमांशुकगन्धमाल्यशोभे ।
भगवति! हरिवल्लभे! मनोज्ञे! त्रिभुवनभूतिकरि! प्रसीद मह्यम् ।।१५।।

दिग्घस्तिभिःकनककुम्भमुखावसृष्टस्वर्वाहिनीविमलचारुजलप्लुताङ्गीम्।
प्रातर्नमामि जगतां जननीमशेषलोकाधिनाथगृहिणीममृताब्धिपुत्रीम् ।।१६।।

कमले! कमलाक्षवल्लभे! त्वं करुणापूरतरङ्गितैरपाङ्गैः।
अवलोकय मामकिञ्चनानां प्रथमं पात्रमकृत्रिमं दयायाः।।१७।।

स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं त्रयीमयीं त्रिभुवनमातरं रमाम्।
गुणाधिका गुरुतरभाग्यभागिनो भवन्ति ते भुवि बुधभाविताशयाः ।।१८।।

।। श्रीभगवत्पादशङ्करविरचितं कनकधारास्तोत्रं सम्पूर्णम् ।।

अथ अन्नपूर्णास्तोत्रम्

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।१।।

नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमानविलसद्वक्षोजकुम्भान्तरी ।
काश्मीरागरुवासिताङ्गरुचिरा काशीपुराधीश्वरी ।
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।२।।

योगानन्दकरी रिपुक्षयकरी धर्मार्थनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी ।
सर्वैश्वर्यसमस्तवाञ्छितकरी काशीपुराधीश्वरी ।
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।३।।

कैलासाचलकन्दरालयकरी गौरी उमा शङ्करी
कौमारी निगमार्थगोचरकरी ओंकारबीजाक्षरी ।
मोक्षद्वारकपाटपाटनकरी काशीपुराधीश्वरी ।
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।४।।

दृश्यादृश्यविभूतिवाहनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रभेदनकरी विज्ञानदीपाङ्कुरी ।
श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी ।
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।५।।

उर्वीसर्वजनेश्वरी भगवती मातान्नपूर्णेश्वरी
वेणीनीलसमानकुन्तलहरी नित्यान्नदानेश्वरी ।
सर्वानन्दकरी सदा शुभकरी काशीपुराधीश्वरी ।
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।६।।

आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी
काश्मीरात्रिजलेश्वरी त्रिलहरी नित्याङ्कुरा शर्वरी ।
कामाकाङ्क्षकरी जनोदयकरी काशीपुराधीश्वरी ।
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।७।।

देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी
वामं स्वादु पयोधरप्रियकरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी सदाशुभकरी काशीपुराधीश्वरी।
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।८।।

चन्द्रार्कानलकोटिकोटिसदृशा चन्द्रांशुबिम्बाधरी
चन्द्रार्काग्निसमानकुन्तलधरी चन्द्रार्कवर्णेश्वरी ।
मालापुस्तकपाशसाङ्कुशधरी काशीपुराधीश्वरी ।
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।९।।

क्षत्रत्राणकरी महाऽभयकरी माता कृपासागरी
साक्षान्मोक्षकरी सदा शिवकरी विश्वेश्वरश्रीधरी ।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी ।
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ।।१०।।

अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति।।११।।

माता च पार्वती देवी पिता देवो महेश्वरः।
बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम्।।१२।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छङ्करभगवतः कृतौ अन्नपूर्णास्तोत्रं सम्पूर्णम्।
।। हरिः ॐ ।।

अथ श्रीसूक्तम्

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह।। १।।
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।।२।।
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुप ह्वये श्रीर्मा देवी जुषताम् ।।३।।
कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ४।।
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मनीमीं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ।।५।।
आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु या अन्तरा याश्च बाह्या अलक्ष्मीः।।६।।
उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ।। ७।
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ।।८।।
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।९।।
मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ।।१०।।
कर्दमेन प्रजा भूता मयि सम्भव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ।।११।।
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले ।।१२।।
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह ।।१३।।
आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जात वेदो म आ वह ।।१४।।
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ।।१५।।
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ।।१६।।

।। इति श्रीसूक्तं सम्पूर्णम् ।।

लक्ष्मीप्रीत्यर्थं पठनीयाः केचन मन्त्राः

पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि।
विश्वप्रिये विश्वमनोऽनुकूले त्वत्पादपद्म मयि सन्निधत्स्व।।
पद्मानने पद्मऊरू पद्माक्षी पद्मसम्भवे।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम्।।
अश्वदायी गोदायी धनदायी महाधने।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे।।
पुत्र-पौत्र-धनं धान्यं हस्त्यश्वादिगवेरथम्।
प्रजानां भवती माता आयुष्मन्तं करोतु मे।।
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम्।।

।। ॐ।।

श्रीजगन्नाथाष्टकम्

कदाचित्कालिन्दीतटविपिनसङ्गीतकरवो मुदाऽऽभीरीनारीवदनकमलाऽऽस्वादमधुपः ।
रमा-शम्भुर्ब्रह्मामरपतिगणेशार्च्चितपदो जगन्नाथस्वामी नयनपथगामी भवतु मे ।।१।।
भुजे सव्ये बेणुं शिरसि शिखिपिच्छं कटितटे दुकूलं नेत्रान्ते सहचर-कटाक्षं विदधते ।
सदा श्रीमद्वृन्दावनवसतिलीलापरिचयो जगन्नाथस्वामी नयनपथगामी भवतु मे ।।२।।
महाम्भोधेस्तीरे कनकरुचिरे नीलशिखरे वसन् प्रासादान्तःसहजबलभद्रेण बलिना ।
सुभद्रामध्यस्थः सकलसुरसेवाऽवसरदो जगन्नाथस्वामी नयनपथगामी भवतु मे ।।३।।
कृपापारावारःसजलजलदश्रेणिरुचिरो रमावाणीरामःस्फुरदमलपद्मेक्षणमुखः ।
सुरेन्द्रैराराध्यःश्रुतिगणशिखा-गीतचरितो जगन्नाथस्वामी नयनपथगामी भवतु मे ।।४।।
रथारुढो गच्छन् पथि मिलित-भूदेव-पटलैः श्रुतिप्रादुर्भावं प्रतिपदमुपाकर्ण्य सदयः ।
दयासिन्धुर्बन्धुः सकलजगतां सिन्धुसुतया जगन्नाथस्वामी नयनपथगामी भवतु मे ।।५।।
परं ब्रह्मापीडःकुबलयदलोत्फुल्लनयनो निवासी नीलाद्रौ निहितचरणोऽनन्तशिरसि ।
रसानन्दो राधा-सरसवपुरालिङ्गनसुखो जगन्नाथस्वामी नयनपथगामी भवतु मे ।।६।।
न वै प्रार्थ्यं राज्यं न च कनकमाणिक्यविभवं न याचेऽहं रम्यां निखिलजनकाम्यां वरवधूम् ।
सदा काले काले प्रमथपतिना गीतचरितो जगन्नाथस्वामी नयनपथगामी भवतु मे ।।७।।
हर त्वं संसारं दुरतरमसारं सुरपते! हरत्वं पापानां विततिमपरां यादवपते! ।
अहो दीनेऽनाथे निहितचरणो निश्चितमिदं जगन्नाथस्वामी नयनपथगामी भवतु मे ।८।

इति जगन्नाथाष्टकं सम्पूर्णम्

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।।

।।ॐ शान्तिःशान्तिः शान्तिः ।।



महामहोपाध्याया:पण्डितकल्याणदत्तशर्माण:
पञ्चाङ्गपथप्रदर्शका: अस्मद्गुरुचरणा:



पञ्चाङ्गकर्त्तु: पूज्यपितृचरणा:
पण्डितबैद्यनाथपाठकमहोदया:



पञ्चाङ्गकर्त्तु: पूज्यामातृचरणा:
लालमतीदेवीमहोदया:



पुरीधाम्नि श्रीजगन्नाथपञ्चाङ्गस्य (दशमाङ्कस्य) लोकार्पणं कुर्वन्त: अस्मत्कुलपतय: **श्रीमदाचार्या: राधावल्लभत्रिपाठिमहोदया:,** तेषां वामभागे पुरी-विद्यापीठस्य प्राचार्या: प्रो.जी.गङ्गन्नामहोदया:, दक्षिणे आन्ध्र-प्रदेशस्थ-तिरुपति-संस्कृत-विद्यापीठस्य कुलपतय: श्रीमदाचार्या: हरेकृष्णशतपथीमहोदया:, तत्रत्या एव कुलपतिचरा: प्रो.डी. प्रहलादाचार्यवर्या:।



श्रीइन्दिरारमणरामानुजदासजी
अध्यक्ष
श्रीरामचन्द्रस्वामीसेवाश्रम



चतुर्दशअङ्कस्य लोकार्पणं कुर्वन्त: उत्तरप्रदेशशासनस्य विधानसभाध्यक्षा: मा. श्रीमाताप्रसादपाण्डेयमहोदया:, प्रौ.शिक्षामन्त्रिण: मा. श्रीब्रह्माशङ्करत्रिपाठिन:, सम्पूर्णानन्दसंस्कृत विश्वविद्यालयस्य कुलपतिचरा: प्रो. अशोककुमारकालियामहोदया:, लखनऊपरिसरप्रचार्या: प्रो. सुरेन्द्रझामहोदया:, संस्थानकुलसचिवा: प्रो. के. वी. सुब्बारायुडुमहोदया:,बी. एच. यू. त: वेदविज्ञानसङ्कायाध्यक्षचरा: प्रो. रामचन्द्रपाण्डेयमहोदया:। दिनाङ्क- १/१२/२०१२ शनिवासर:

।। ऊँ श्रीमते रामानुजाय नमः ।।

श्री रामचन्द्रस्वामी सेवाश्रम

लोकनाथरोड, पुरी–2



स्व॰ श्रीरामचन्द्रस्वामी
आद्य पंचांग प्रकाशक



श्रीइन्दिरारमणरामानुजदासजी
अध्यक्ष, श्रीरामचन्द्रस्वामीसेवाश्रम

पुरीशहर में स्थित भगवान लोकनाथजी के मन्दिर से कुछ ही दूर दक्षिण में स्थित स्वामी जी की यह तप: स्थली अब असंख्य निर्धन जनता जनार्दन के स्वास्थ्य-सेवा का मुख्य केन्द्र बन गया है। इस सेवाश्रम द्वारा निर्धनों के शारीरिक रोग निवारणार्थनि:शुल्क चिकित्सा एवं औषधि की व्यवस्था की जाती है। यहाँ वर्ष में विशेष रूप से एक बार मुफ्त आँख का आपरेशन देश के लब्ध-प्रतिष्ठित चक्षु:विशेषज्ञों की सहायता से कराया जाता है। जिससे इस वर्ष तक इस संस्था के द्वारा आयोजित अनेक नेत्र-चिकित्सा-शिविरोंमें शताधिक चक्षु:हीन लोगों को नयनज्योति की प्राप्ति हुई है।

शिक्षा मनुष्य जीवन की प्रथम आवश्यकता है। इस भावना से आप्लावित स्वामीजी ने आवासीय वेदविद्यालय की व्यवस्था की है। इसे कालान्तर में आध्यात्मिक वैदिकशोधसंस्थान बनाने का विचार था लेकिन इसके मध्य आश्रम के संस्थापक महन्थश्रीरामचन्द्ररामानुजदासजी का गोलोक में महाप्रयाण हो गया। जिससे सनातन वैदिकसंस्कृति की अपूरणीय क्षतिहुई। लेकिन श्रीजगन्नाथमहाप्रभुजी की कृपा से अब इस इस पुनीत कार्य को जियर स्वामी मठ के यशस्वी श्रीमहन्थ तथा इस सेवाश्रम के अध्यक्ष स्वामी श्रीइन्दिरारमणरामानुजदासजी महाराज ने दायित्व सम्भाला है। इनके निर्देश से यह संस्था अनुदिन विकासोन्मुख होते हुए यशस्विता को प्राप्त कर रही है। आश्रम संस्थापक स्वामीजी की तरह इनकी भी अभिरूचि संस्कृत तथा वैदिक संस्कृति की रक्षा में सर्वदा रहती है। इसके लिए श्रीजगन्नाथ सम्पादकमण्डल इनका हार्दिक अभिनन्दन करता है। - **आइये हम सब मिलकर स्वामीजी के जनहित यज्ञ में तन-मन- धनसे सहयोग प्रदानकर पुण्य तथा यश के भागी बनें।**



पञ्चाङ्गकर्त्ता प्रधानसम्पादकश्च -
प्रो.मदनमोहनपाठकः

प्रकाशकः - ज्योतिर्विज्ञान-अनुसन्धान-केन्द्रम्, वेदानन्दाश्रमः, खरगापुर, गोमतीनगर, लखनऊ- २२६०१० (उ.प्र.)
www.vedanandashram.in
ISSN-2320-3501